M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 461

Title: Sabha Parva
(Mahabharata)

761

761

सभापर्व from महाभारत
Incomplete

Sabhā parva from		Title
Mahabharata.		Author
		Editor
		Year. Vols.
		Publisher
761		Remarks

761

नैकः कच्चिन्नाव बहुभिः सह ॥ कच्चित्ते मंत्रितो मंत्रो न राष्ट्रमनुधावती ॥ कच्चिदर्थान्विनिश्चित्य लघुमूलान्महा
फलान् ॥ क्षिप्रमारभसे कर्तुं नाविघ्नयसि तादृशान् ॥ कच्चिन्न सर्वे कर्मांता परोक्षास्ते विशंकिता ॥ सर्वे वा पुनरुत्सृ
ष्टा संसृष्टा वत्र कारणं ॥ कच्चिद्राजन्कृतान्येव कृतप्रायाणि वा पुनः ॥ विदुस्ते वीर कर्माणी नानवाप्तानि कानिचि
त ॥ कच्चित्कारणिकाः सर्वे सर्वशास्त्रेषु कोविदाः ॥ कारयंति कुमारांश्च योधमुख्यानि सर्वशः ॥ कच्चित्सहस्रैर्मू
र्खाणामेकं क्रीणासि पंडितं ॥ पंडितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं परं ॥ कच्चित्सर्वाणि दुर्गाणी धनाद्यायुधोद
कैः ॥ यंत्रैश्च परिपूर्णानी तथा शिल्पिधनुर्धरैः ॥ परोप्यमात्यो मेधावी शूरो दांतो विचक्षणः ॥ राजानं राजपुत्रं वा
प्रापयन्महतीं श्रियं ॥ कच्चिदष्टादशान्येषु स्वपक्षे दश पंच च ॥ त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः ॥ कच्चि
द्द्विषामविदितः प्रतिपन्नश्च सर्वदा ॥ नित्ययुक्तो रिपून्सर्वान्वीक्षसे कुरुनंदन ॥ कच्चिद्विनयसंपन्नः कुलपुत्रो बहु
श्रुतः ॥ अनसूयुरनुप्रष्टा सत्कृतस्ते पुरोहितः ॥ कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः ॥ हुतं च होष्य
माणं च काले वेदयते सदा ॥ कच्चिदंगेषु निष्णातो ज्योतिषां प्रतिपादकः ॥ उत्पातेषु च सर्वेषु दैवज्ञः कुशलः

=ण=२

शुचिः॥ कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमान्॥ जघन्यांश्च जघन्येषु भृत्यास्ते तात योजिताः॥ अमात्यानुपधा
७ तीतान्पितृपैतामहान्शुचीन्॥ श्रेष्ठान्श्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु॥ कच्चिन्नोग्रेण दंडेन भृशमुद्वेजयसे प्र
जाः॥ राष्ट्रं तवानुशासंति मंत्रिणो भरतर्षभ॥ कच्चित्त्वां न जहत्येते याचकाः प्रयतं तित्व॥ उग्रप्रतिग्रहीतारं का
मयानमिव स्त्रियः॥ कच्चिद्धृष्टश्च शूरश्च मतिमान्धृतिमान्शुचिः॥ कुलीनश्चानुरक्तश्च दक्षः सेनापतिस्त
व॥ कच्चिद्बलेन संयुक्ताः सर्वे युद्धविशारदाः॥ दृष्टा सर्वे च विक्रांतास्त्वया सत्कृत्य मानिताः॥ कच्चिद्बलं च भ
क्तं च वेतनं च यथोचितं॥ संप्राप्तकाले दातव्यं ददासि न च कर्षसि॥ कालातिक्रमणे ह्येते भक्तवेतनयोर्भृ
ताः॥ भर्तुः कुर्वंति दौर्गत्यात्सोनर्थः सुमहान्स्मृतः॥ कच्चित्सर्वेनुरक्तास्त्वां कुलपुत्राः प्रधानतः॥ कच्चित्प्रा
णांस्तवार्थेषु संत्यक्ष्यंति सदा युधि॥ कच्चिदेको बहूनर्थान्सर्वतः सांपरायिकान्॥ अनुशास्सि यथाकामं का ७
मात्मा शासनातिगः॥ कच्चित्पुरुषकारेण पुरुषः कर्म शोभयन्॥ लभते मानमधिकं भूयो वाधिकवेतनं॥
कच्चिद्विद्याविनीतांश्च नरान्ज्ञानविशारदान्॥ यथार्हं गुणतश्चैव दानेनाभ्युपपद्यसे॥ कच्चिद्दारान्मनुष्याणां

तवार्थमृत्युमीयुषां॥ व्यसनं चाभ्युपेतानां बिभर्षि भरतर्षभ॥ कच्चिद्भयादुपगतं क्लीबं वा रिपुमागतं॥ युद्धे नवि
जितं पार्थ पुत्रवत्परिरक्षसे॥ कच्चित्त्वमस्याः सर्वस्या वृद्धिहीनां न भुवः पतेः॥ समश्च नाभिशंक्यश्च यथा माता यथा
पिता॥ कच्चिद्व्यसनिनः शत्रून्निशम्य भरतर्षभ॥ अभियासि जवेनैव समीक्ष्य त्रिविधं बलं॥ पार्ष्णिमूलं च वि
ज्ञाय व्यवसायं पराजयं॥ बलस्य च महाराज दत्वा वेतनमग्रतः॥ कच्चिन्न पुरमुख्येभ्यः परराष्ट्रे परंतप॥ उपस्थि
तानि रत्नानि प्रयच्छसि यथार्थतः॥ कच्चिदात्मानमेवाग्रे विजित्य विजितेंद्रियः॥ परान्जिगीषसे पार्थ प्रमत्तानजि
तेंद्रियान्॥ कच्चित्तया स्यतः शत्रून्पूर्वं यासि विशांपते॥ तांश्चाविक्रस्य जेतुं जित्वा च परिरक्षसि॥ कच्चिदष्टा
गसंयुक्ता चतुर्विधबला चमूः॥ बलमुख्यैः सुनीता ते द्विषतां प्रतिबोधिनी॥ कच्चिल्लवं च मुष्टिं च परराष्ट्रे प
रंतप॥ अविहाय महाराज विहंसि समयं रिपोः॥ कच्चित्स्वपरराष्ट्रेषु बहवोधिकृतास्त्वया॥ अर्थं समनुतिष्ठं
ति रक्षंति च परस्परं॥ कच्चिदभ्यवहार्याणि गात्रसंस्पर्शकानि च॥ घ्रेयाणि च महाराज रक्षंत्यनुमतास्तव॥ क
च्चित्कोष्ठं च कोशं च वाहनं वरमायुधं॥ आयश्च कृतकल्याणैस्तव भक्तैरनुष्ठितः॥ कच्चिदाभ्यंतरेभ्यश्च बा

सभा
८

द्वेष्यश्च विशांपते॥ रक्ष्यस्यात्मानमेवाग्रे तांश्च तेभ्यो मियश्च रक्ष॥ कच्चिन्नपाने द्यूते वा क्रीडासु प्रमदासु च।
प्रतिजानंति पूर्वाह्णे व्ययं व्यसनजं तव॥ कच्चिदायस्य चार्द्धेन चतुर्भागेन वा पुनः॥ पादभागैस्त्रिभिर्वापि व्ययः
संशुध्यते तव॥ कच्चिज्ज्ञातीन्गुरून्वृद्धान्वणिजः शिल्पिनस्तथा॥ अभीक्ष्णमनुगृह्णासि धनधान्येन दुःखितान्॥
= छंति = कच्चिदायव्यये युक्ताः सर्वे गणकलेखकाः॥ अनुति पूर्वाह्णे नित्यमायव्ययं तव॥ कच्चिदर्थेषु संप्रौढान् हितकामाननु
प्रियान्॥ नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषं॥ कच्चिद्विदित्वा पुरुषान् उत्तमाधममध्यमान्॥ त्वं कर्मस्वनु
रूपेषु नियोजयसि भारत॥ कच्चिन्न लुब्धाश्चौरा वा वैरिणो वा विशांपते॥ अप्राप्तव्यवहारा वा तव कर्मस्वनुष्ठि
ता॥ कच्चिन्न लुब्धैश्चौरैर्वा कुमारैः स्त्रीबलेन वा॥ त्वया वा पीड्यते राष्ट्रं कच्चित्पुष्टाः कृषीवलाः॥ कच्चिद्राष्ट्रे तडागा
नि पूर्णानि च महांति च॥ भागशो विनिविष्टानि न कृषिर्देवमातृका॥ कच्चिद्बीजं च भक्तं च कर्षकस्यावसीदति॥ प्रत्ये
कं च शतं राजन् ददास्यृणमनुग्रहं॥ कच्चित्स्वनुष्ठिता राजन्वार्ता ते साधुभिर्जनैः॥ वार्तायां संश्रितस्तात लोकोयं सुख ८
मेधते॥ कच्चिच्छूराः कृतप्रज्ञाः पंच पंच स्वनुष्ठिताः॥ क्षेमं कुर्वंति संहत्य राजन्जनपदे तव॥ कच्चिन्नगररक्षार्थं ग्रामा

नगरवत्कृताः॥ ग्रामवच्च कृता घोषास्ते सर्वे तु त्वदर्पणाः॥ कच्चिद्बलेनानुगताः समानि विषमाणि च॥ पुराणानि नगरा
ध्यक्षाः श्चरंति विषये तव॥ कच्चित्स्त्रियः सांत्वयसि कच्चित्ताश्च सुरक्षिताः॥ कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे॥ क
च्चिच्चारान्निशि श्रुत्वा तत्कार्यमनुचिंतयन्॥ प्रियाण्यनुभवन्शेषे संशोध्याभ्यंतरं जनं॥ कच्चिद्द्वौ प्रथमौ यामौ रात्र्यां सुप्त्वा
विशांपते॥ संचिंतयसि धर्मार्थौ याम उत्थाय पश्चिमे॥ कच्चिद्दर्शयसे नित्यं मनुष्यान्समलंकृतान्॥ उत्थाय काले का
लज्ञः सह पांडव मंत्रिभिः॥ कच्चिद्रक्तांबरधराः खड्गहस्ताः स्वलंकृताः॥ अभितस्त्वामुपासंते रक्षणार्थमरिंदमाः॥ क
च्चिद्दंड्येषु यमवत्पूज्येषु वरदेववत्॥ परीक्ष्य वर्तसे सम्यगप्रियेषु प्रियेषु च॥ कच्चिच्छरीरमाबाधमौषधैर्नियमेन वा॥ मा
नसं वृद्धसेवाभिः सदा पार्थ जिहीर्षसि॥ कच्चिद्वैद्याश्चिकित्सायामष्टांगायां विशारदाः॥ सुहृदश्चानुरक्ताश्च शरीरे ते हि
ताः सदा॥ कच्चिन्न मानान्मोहाद्वा कामाद्वापि विशांपते॥ अर्थिप्रत्यर्थिनः प्राप्तान्नापेक्षसि कथंचन॥ कच्चिन्न मोहाल्लोभा
द्वा विश्रंभात्प्रणयेन वा॥ आश्रितानां मनुष्याणां वृत्तिं त्वं संरुणत्सि च॥ कच्चिन्न पौराः सहिता ये च ते राष्ट्रवासिनः॥ त्वया
सह विरुध्यंते परैः क्रीताः कथंचन॥ कच्चिन्न दुर्बलः शत्रुर्बलान्निपीडितः॥ मंत्रेण बलवान्कच्चिदुभाभ्यां वा युधिष्ठिर॥

कच्चित्सर्वेनुरक्तास्त्वां भूमिपालाः प्रधानतः॥ कच्चित्प्राणांस्त्वदर्थेषु संत्यजंति त्वयादृताः॥ कच्चित्ते सर्वविद्यासु गुणवंतः प्र
वर्तिताः॥ ब्राह्मणानां च साधूनां संनतिः श्रेयसे शुभा॥ कच्चिद्धृद त्रयीमूले पूर्वैराचरितेनघ॥ यतमानस्तथा कर्तुं तस्मि
न्कर्मणि वर्तसे॥ कच्चित्तव गृहेन्नानि स्वादून्यश्नंति वै द्विजाः॥ गुणवंति गुणोपेतास्तवाध्यक्षाः सदक्षिणाः॥ कच्चित्कुर्वंस्यव
च्छिन्नान्वाजपेयांश्च सर्वशः॥ पुंडरीकांश्च कार्त्स्न्येन यतसे कर्तुमात्मवान्॥ कच्चिज्ज्ञातीन्गुरून्वृद्धान्दैवतांस्तापसान
पि॥ चैत्यांश्च वृक्षान्कल्याणान्ब्राह्मणांश्च नमस्यसि॥ कच्चिद्धर्मे च ते बुद्धिरतिरेका च तेनघ॥ आयुष्या च यशस्या च
धर्मकामार्थदर्शिनी॥ एतया वर्तमानस्य बुध्या राष्ट्रं न सीदति॥ विजित्य च महीं राजा सोत्यंतं सुखमेधते॥ कच्चिदार्यो
विशुद्धात्मा क्षारितश्चौरकर्मणि॥ अदृष्टशास्त्रकुशलैर्न लोभाद्वध्यते शुचिः॥ दुष्टो गृहीतस्तत्कारी चौरो दृष्टः सकारणः॥
कच्चिन्न मुच्यते स्तेनो द्रव्यलोभान्नरर्षभ॥ उत्पन्नान्कच्चिदाढ्यस्य दरिद्रस्य च वा पुनः॥ अर्थान्मिथ्या न पश्यंति तवामा
त्या हृता धनैः॥ नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रतां॥ अदर्शनं ज्ञानवतामालस्यं क्षिप्तचित्ततां॥ एकचिं
तनमर्थानामनर्थज्ञैश्च चिंतनं॥ निश्चितानामनारंभं मंत्रस्यापरिरक्षणं॥ मंगलस्याप्रयोगं च प्रसंगं विषयेषु च॥ क

च्चित्त्वं वर्जयस्येतान् राजदोषांश्चतुर्दश॥ कच्चित्ते सफला वेदाः कच्चित्ते सफलं धनं॥ कच्चित्ते सफला दाराः कच्चित्ते
सफलं श्रुतं॥ ॥युधिष्ठिर उवाच॥ ॥कथं वै सफला वेदाः कथं वै सफलं धनं॥ कथं वै सफला दाराः कथं वै सफ
श्रुतं॥१००॥ नारद उवाच॥ ॥अग्निहोत्रफला वेदाः दत्तभुक्तफलं धनं॥ रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतं॥ एत
दाख्याय स मुनिर्नारदः स महातपाः॥ पप्रच्छानंतरमिदं धर्मराजं युधिष्ठिरं॥ ॥नारद उवाच॥ ॥कच्चिदभ्यागतान्
दूराद्वणिजो लाभकारणात्॥ यथोक्तं व्यवहार्यं ते शुल्कं शुल्कोपजीविनः॥ कच्चित्ते पुरुषा राजन् पुरराष्ट्रे सुमानद॥ उपा
नयंति पण्यानि उपधाभिर्न वंचिताः॥ कच्चिच्छृणोषि वृद्धानां धर्मार्थसहिता गिरः॥ नित्यमर्थविदां तात तथा ध
र्मार्थदर्शिनां॥ कच्चित्ते कृषितंत्रेषु गोषु पुष्पफलेषु च॥ धर्मार्थं च द्विजमुख्येभ्यो दीयते मधुसर्पिषी॥ द्रव्योपकरणं किंचि
त्सर्वदा सर्वशिल्पिनां॥ चातुर्मास्यवरं किंचिन्नियतं संप्रयच्छसि॥ कच्चित्कृतं विजानीषे कर्तारं च प्रशंससि॥ स
तां मध्ये महाराज सत्करोषि च पूजयन्॥ कच्चित्सूत्राणि सर्वाणि गृह्णीषे पुरुषर्षभ॥ हस्तिसूत्राश्वसूत्राणि र
थसूत्राणि वा विभो॥ कच्चिदभ्यस्यते सम्यग्गृहे ते भरतर्षभ॥ धनुर्वेदस्य सूत्रं च यंत्रसूत्रं च नागरं॥ कच्चिदस्त्रा

स भा श्री १० णि सर्वाणि ब्रह्मन्दं उक्ता भारत॥ विषया गोचरे सर्वे विदिताः प्राणनाशनाः॥ कच्चिदग्निभयाच्चैव सर्पव्यालभ
यात्तथा॥ रोगरक्षोभयाच्चैव राष्ट्रं न परिरक्षसी॥ कच्चिदंधांश्च मूकांश्च पंगून्व्यंगानबांधवान्॥ पितेव पासि ध
र्मज्ञ तथा प्रव्रजितानपि॥ ॥वैशंपायन उवाच॥ ॥एताः कुरूणामृषभो महात्मा श्रुत्वा गिरो ब्राह्मणसत्तम
स्य॥ प्रणम्य पादावभिवाद्य हृष्टो राजाब्रवीन्नारदं देवरूपं॥ एवं करिष्यामि यथैव तदुक्तं प्रज्ञा हि मे भूय एवा
भिवृद्धा॥ उक्त्वा तथा चैव चकार राजा लेभे महीं सागरमेखलां च॥ ॥नारद उवाच॥ ॥एवं यो वर्तते राजा
चातुर्वर्ण्यस्य रक्षणे॥ स विहृत्येह सुसुखी शक्रस्यैति सलोकतां॥ ११५॥ ॥इति श्रीमहाभारते सभा
पर्वणि पंचमोध्यायः॥ ॥वैशंपायन उवाच॥ ॥संपूज्याथाभ्यनुज्ञातो महर्षेर्वचनात्परं॥ प्रत्युवाचानुपूर्व्येण ध
र्मराजो युधिष्ठिरः॥ भगवान्न्याय्यमाहैतं यथावद्धर्मनिश्चयं॥ यथाशास्त्रं क्रियतां न्याय्यं क्रियते तं विधिर्मया॥ राजभि श्री
र्यथा पूर्वं कार्यं पुरा शत्रूनसंशयः॥ यथावदुपनीतार्थं कृतं हेतुमदर्थवत्॥ वयं तु सत्पथं तेषां यातुमिच्छामहे तथा॥ न १०
तु शक्यं तथा गंतुं यथा तैर्नियतात्मभिः॥ ॥वैशंपायन उवाच॥ ॥तं तु विश्रांतमासीनं मुपासीनो युधिष्ठिरः॥ अ

पृच्छत्पांडवस्तत्र राजमध्ये महाद्युतिः॥ ॥युधिष्ठिर उवाच॥ ॥भवान्संचरते लोकान्सदा नानाविधान्बहून्॥
ब्रह्मणा निर्मितान्पूर्वं प्रेक्ष्यमाणो मनोजवः॥ ईदृशी भवता काच्चिद्दृष्टपूर्वा सभा क्वचित्॥ इतो वा श्रेयसी ब्रह्मन्तन्मे
माचक्ष्व पृच्छतः॥ तच्छ्रुत्वा नारदस्तस्य धर्मराजस्य भाषितं॥ पांडवान्प्रत्युवाचेदं स्मयन्मधुरया गिरा॥ मानुषेषु
न मे तात दृष्टपूर्वा न च श्रुता॥ सभा मणिमयी राजन्यथेयं तव भारत॥ सभां तु पितृराजस्य वरुणस्य च धीमतः॥ कथ
यिष्ये महेंद्रस्यैव कैलासनिलयस्य च॥ ब्रह्मणश्च सभां दिव्यां कथयिष्ये गतक्लमां॥ दिव्यादिव्यैरभिप्रायैरुपेतां विश्वरू
पिणीं॥ देवैः पितृगणैः साध्यैर्ऋषिभिः संयतात्मभिः॥ जुष्टां मुनिगणैः सर्वैर्वेददैर्यज्ञैः सदक्षिणैः॥ यदि ते श्रवणे बु
द्धिर्वर्तते भरतर्षभ॥ नारदेनैवमुक्तस्तु धर्मराजो युधिष्ठिरः॥ प्रांजलिर्भ्रातृभिः सार्द्धं तैः सर्वैर्नृपसत्तमैः॥ नारद
प्रत्युवाचेदं धर्मराजो महामनाः॥ सभाः कथय ताः सर्वाः श्रोतुमिच्छामहे वयं॥ ॥युधिष्ठिर उवाच॥ ॥किंद्रव्यास्ताः
सभा ब्रह्मन्किंविस्ताराः किमर्थतः॥ पितामहं च के तस्यां सभायां पर्युपासते॥ वासवं देवराजं च यमं वैवस्वतं च के॥ व
रुणं वा कुबेरं च सभायां पर्युपासते॥ एतत्सर्वं यथावच्च देवर्षे वदतस्तव॥ श्रोतुमिच्छाम सहिताः परं कौतूहलं हि नः॥

सभापर्व एवमुक्तः पांडवेन नारदः प्रत्युवाच ह ॥ क्रमेण राजन्दिव्यास्ताः श्रूयतामिह ताः सभाः ॥ २० ॥ ॥ इति श्रीमहाभारते स
११ भापर्वणि युधिष्ठिरप्रश्ने षष्ठोऽध्यायः ॥ ॥ नारद उवाच ॥ ॥ शक्रस्य तु सभा रम्या भास्वरा कर्मनिर्मिता ॥ स्वयं शक्रे
ण कौरव्य निर्मितार्कसमप्रभा ॥ विस्तीर्णा योजनशतं शतमध्यर्धमायता ॥ आयामव्यामविस्तीर्णा पंच योजनमु
च्छ्रिता ॥ जराशोकक्लमेहनानि रातंका शशिप्रभा ॥ वेश्मासनवती रम्या दिव्यपादपशोभिता ॥ तस्यां देवेश्वरः पार्थ
सभायां परमासने ॥ आस्ते शच्या महेंद्राण्या श्रिया लक्ष्म्या च भारत ॥ बिभ्रद्वपुरनिर्देश्यं किरीटी लोहितांगदः ॥ विरजांबरश्चि
त्रमाल्यो ह्रीकीर्तिद्युतिभिः सह ॥ तथा उपासते नित्यं महात्मानं शतक्रतुं ॥ मरुतः सर्वतो राजन्सर्वे च गृहमेधिनः ॥ सिद्धा
देवर्षयश्चैव साध्या देवगणास्तथा ॥ मरुत्वंतश्च सहिता भास्वंतो हेममालिनः ॥ एते सानुचराः सर्वे दिव्यरूपाः स्वलंकृताः
॥ उपासते महाराजं देवराजमरिंदमं ॥ तथा देवर्षयः सर्वे पार्थ शक्रमुपासते ॥ विमला धुतपाप्मानो दीप्यमाना इवाग्नयः ॥ ११
अथर्वतेज्यजः स्तामा विपाप्मानो गतक्लमाः ॥ पराशरः पर्वतश्च तथा सावर्णिगालवौ ॥ शंखश्च लिखितश्चैव तथा गौरशि
रा मुनिः ॥ दुर्वासाश्च दीर्घतपा याज्ञवल्क्यश्च भालुकिः ॥ उद्दालकः श्वेतकेतुस्तथा सांख्यायनिः प्रभुः ॥ हविष्मांश्च गविष्ठश्च

हरिश्चंद्रश्च पार्थिवः ॥ अनंतदंतः स्त्वष्टा च विश्वकर्मा च तुंबरुः ॥ हृद्यश्चोदरशांडिल्यः पाराशर्यः कृतानृपः ॥ वातस्कंधो विशा
खश्च विधाता काल एव च ॥ शतानीकः सत्यवांश्चैव प्रचेताः सत्यसंगरः ॥ मेधातिथिर्वामदेवः पुलस्त्यः पुलहः क्रतुः ॥ मरुत्तश्च
मरीचिश्च स्थाणुश्चात्रिर्महातपाः ॥ अयोनिजा योनिजाश्च वायुभक्षा हुताशनाः ॥ ईशानं सर्वलोकस्य वज्रिणं समुपा
सते ॥ सुहृदश्च सुनीथश्च वाल्मीकिश्च महातपाः ॥ अनंतदंतस्त्वष्टा च विश्वकर्मा च तुंबरुः ॥ कक्षीवान्गौतमस्तार्क्ष्यः
स्तपोव्यानव्यानुजः ॥ मुनिः कालकवृक्षीयः श्राव्यश्चाथ हिरण्यदः ॥ संवर्तो देवहव्यश्च विष्वक्सेनश्च वीर्यवान् ॥ दिव्या
आपः स्तथौषध्यः श्रद्धा मेधा सरस्वती ॥ अर्थो धर्मश्च कामश्च विद्युतश्चापि पांडव ॥ जलवाहास्तथा मेघा वायवस्तनयित्नवः ॥
प्राचीदिशा मघा साध्य पावकाः सप्तविंशतिः ॥ अग्नीषोमौ तथेंद्राग्नी मित्रोऽपि सवितार्यमा ॥ भगो विश्वे तथा साध्याश्च
शुक्रो मंकिश्च भारत ॥ यज्ञाश्च दक्षिणाश्चैव ग्रहाः स्तोमाश्च सर्वशः ॥ यज्ञवाहाश्च ये मंत्राः सर्वे तत्र सभासते ॥ तथै
वाप्सरसो राजन्गंधर्वाश्च मनोरमाः ॥ नृत्यवादित्रगीतैश्च हास्यैश्च विविधैस्तथा ॥ रमयंति स्म सततं देवराजं शत
क्रतुं ॥ स्तुतिभिर्मंगलैश्चैव स्तुवंतः कर्मभिस्तथा ॥ विक्रमैश्च महात्मानं बलवृत्रनिषूदनं ॥ ब्रह्मराजर्षयः सर्वे

सभापर्व
१२

सर्वे देवर्षयः स्तथा ॥ विमानैर्विविधैर्दिव्यैर्भ्राजमाना इवाग्नयः ॥ स्रग्विणो भूषिताश्चान्ये यांति चायांति चा
परे ॥ बृहस्पतिश्च शुक्रश्च तस्यामाजग्मतुः सह ॥ एते चान्ये च बहवो यतात्मानो यतव्रताः ॥ विमानैश्चंद्रसंका
शैः सोमवत्प्रियदर्शनाः ॥ ब्रह्मणो भवनाद्राजन्भृगुः सप्तर्षयः स्तथा ॥ एषा सभा महाराज दृष्टा पुष्करमालि
नी ॥ शतक्रतोर्महाराज याम्यां शृणु ममानघ ॥ ॥ इति श्रीमहाभारते सभापर्वणि सप्तमोध्यायः ॥ ॥
॥ वैशंपायन उवाच ॥ ॥ कथयिष्ये सभां दिव्यां युधिष्ठिर निबोध तां ॥ वैवस्वतस्य यामर्थे विश्वकर्मा चकार ह ॥ तेजसी
सा सभा राजन्बभूव शतयोजना ॥ विस्तारायामसंपन्ना भूयसी चापि पांडव ॥ अर्कप्रभा भ्राजिष्णुः सर्वतः कामचारिणी
॥ नैवातिशीता नात्युष्णा मनसश्च प्रहर्षिणी ॥ न शोको न जरा तस्यां क्षुत्पिपासा च नाप्रियं ॥ न च दैन्यं क्लमो नापी प्रति
कूलं न चाप्युत ॥ सर्वे कामाः स्थितास्तस्यां ये दिव्या ये च मानुषाः ॥ रसवच्च प्रभूतं च भक्ष्यभोज्यमरिंदम ॥ पुण्यगंधाः
स्रजः स्तत्र नित्यपुष्पफलद्रुमाः ॥ शीतलानि चेतोयानी सखोष्णानि च भारत ॥ तस्यां राजर्षयः पुण्यास्तथा महर्षे
यो मलाः ॥ यमं वैवस्वतं पार्थ प्रहृष्टाः पर्युपासते ॥ त्रसदस्युश्च तुरथः कृतवीर्यः श्रुतश्रवाः ॥ अरिसेनश्चासिंह १२

श्च कृतवेगः कृतिर्निमिः ॥ प्रतर्दनः शिबिर्मत्स्यः पृथ्वक्षोथ बृहद्रथः ॥ एडो मरुत्तः कुशिकः सांकाश्यः सांकृतिर्भ
वः ॥ चतुरश्वः सदश्वोर्मिः कार्तवीर्यश्च पार्थिवः ॥ भरतस्तथा सुरथः सुनीथो नैषधो नलः ॥ दिवोदासश्च सुम १३
नाः अंबरीषो भगीरथः ॥ व्यश्वः सदश्वो वध्र्यश्वः पंचहस्तः पृथुश्रवाः ॥ रामपादोनरंण्यश्च रोहिताश्वाप्यनु
हूवः ॥ रुसंगुर्वृषसेनश्च क्षुपश्च रथिनां वरः ॥ मुचुकुंदश्च विस्कमना पुरुकुत्सो ध्वजी रथी ॥ आर्ष्टिषेणो दिलीपश्च
महात्मा चाप्युशीनरः ॥ ऋतुश्च पुंडरीकश्च शर्यातिः शरभः शुचिः ॥ अंगोरिष्टश्च वेणुश्च दुष्यंतः संजयो जयः ॥
भंगासुरिः सुनीथश्च निषधोथ त्विषीरथः ॥ करंधमो बाह्लिकश्च सुद्युम्नो बलवान्मधुः ॥ वैन्यापृथुसुवत्त
श्च बलवान्पृथिवीपतिः ॥ कपोतरोमा तृणकः सहदेवार्जुनौ तथा ॥ रामो दाशरथिश्चैव लक्ष्मणोथ प्रतर्दनः ॥ अ
लर्कः कक्षसेनश्च गयो गौराश्व एव च ॥ जामदग्न्योथ रामोत्र नाभागः सगरस्तथा ॥ वैन्यो राजा वारिषेणः पुरुजो जन
मेजयः ॥ ब्रह्मदत्तस्त्रिगर्तश्च राजोपरिचरस्तथा ॥ भूरिद्युम्नो महाश्वश्च पृथ्वश्वो धनकस्तथा ॥ इंद्रद्युम्नो भीमजानुः
गतः पृथुर्नयोजयः ॥ पद्मोथ मुचकुंदश्च भूरिद्युम्नश्च सेनाजितः ॥ अरिष्टनेमिः प्रद्युम्नः पृथगश्वोजकस्तथा ॥ शत

मत्स्यानां पतयः शतं नीपाः शतं हयाः॥ धृतराष्ट्राश्चैकशतं मशीतिर्जनमेजयः॥ शतं च ब्रह्मदत्तानां मीरिणां वीरिणां
१३ शतं॥ शंतनुश्चैव राजर्षिः पांडुश्चैव पिता तव॥ उशद्गवः शतरथो देवराजो जयद्रथः॥ वृषादर्भिश्च राजर्षिर्वास
सः सह मंत्रिताः॥ अथापरे सहस्राणि ये गताः शशबिंदवः॥ इष्ट्वाश्वमेधैर्बहुभिर्महद्भिर्भूरिदक्षिणैः॥ एते रा
जर्षयः पुण्याः कीर्तिमंतो बहुश्रुताः॥ तस्यां सभायां राजेंद्र वैवस्वतमुपासते॥ अगस्त्योथ मतंगश्च कालो मृ
त्युस्तथैव च॥ यज्वानश्चैव सिद्धाश्च ये च योगशरीरिणः॥ पितरश्च महात्मानः फेनपाश्चोष्मपाश्च ये॥ स्व
धावंतो बर्हिषदो मूर्तिमंतस्तथापरे॥ कालचक्रं च साक्षाच्च भगवान्हव्यवाहनः॥ नरा दुष्कृतकर्माणो दक्षिणा
यनमृत्यवः॥ कालस्य नयने युक्ता यमस्य पुरुषाश्च ये॥ तस्यां शिंशिपपालाशास्तथा काशकुशादयः॥ उपास
ते धर्मराजं मूर्तिमंतो युधिष्ठिर॥ एते चान्ये च बहवो पितृराजसभासदः॥ अशक्याः परिसंख्यातुं नामभिः क
र्मभिस्तथा॥ असंबाधा हि सा पार्थ रम्या कामगमा सभा॥ दीर्घकालं तपस्तप्त्वा निर्मिता विश्वकर्मणा॥ प्रका १३
शंतीव ज्वलंतीव तेजसा स्वेन भारत॥ तामुग्रतपसो यांति सुव्रताः सत्यवादिनः॥ शांताः संन्यासिनो राजन्सि
द्धाः पुण्येन कर्मणा॥ सर्वेताः स्वरदेहाश्च सर्वे च विरजोंबराः॥ चित्रांगदाश्चित्रमाल्याः सर्वे ज्वलितकुंडलाः॥

स्वच्छैतः कर्मभिर्दिव्यैः परिबर्हैश्च भूषिताः॥ गंधर्वाश्च महात्मानः सदैवाप्सरसां गणाः॥ वादित्रं नृत्यगी
तं च हास्यं लास्यं च सर्वशः॥ पुण्याश्च गंधाः शब्दाश्च तस्यां पार्थ समंततः॥ दिव्यानि चैव माल्यानि उपति
ष्ठंति नित्यशः॥ शतं शतसहस्राणां धर्मिणां तं प्रजेश्वरं॥ उपासते महात्मानं रूपयुक्ता मनस्विनः॥ ईदृशी
सा सभा राजन्पितृराज्ञो महात्मनः॥ वरुणस्यापि वक्ष्यामि सभां पुष्करमालिनीं॥ ३७॥ ॥ इति श्रीमहा
भारते सभापर्वणि यमसभावर्णनं नाम अष्टमोध्यायः॥ ॥ नारद उवाच॥ ॥ युधिष्ठिर सभा दिव्या वै
रुणस्यामितप्रभा॥ प्रमाणेन यथा याम्या शुभप्राकारमंदिरा॥ अंतः सलिलमास्थाय निर्मिता विश्वकर्मणा॥ दि
व्यैः रत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युता॥ नीलपीतासितश्यामैः सितैर्लोहितकैरपि॥ अवतानैस्तथा गुल्मैः
पुष्पमंजरिवारिभिः॥ तथा शकुनयस्तस्यां नानारूपा मृदुस्वराः॥ अनिर्देश्या वपुष्मंतः शतशोथ सहस्र
शः॥ सा सभा सुखसंस्पर्शा न शीता न च घर्मदा॥ वेश्मासनवती रम्या सिता वरुणपालिता॥ यस्यामा
स्ते स वरुणो वारुण्या सह भारत॥ दिव्यरत्नांबरधरो भूषणैरुपशोभितः॥ स्रग्विणो भूषिताश्चापि दि

सभापर्व
१४

व्यमाल्यापकर्षिणः॥ आदित्यास्तत्र वरुणं जलेश्वरमुपासते॥ वासुकिस्तक्षकश्चैव नागश्चैरावतस्त
था॥ कृष्णश्च लोहितश्चैव पद्मचित्रश्च वीर्यवान्॥ कंबलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ॥ मणिमान्कुंडलधरो
कर्कोटकधनंजयौ॥ एली मार्कंडकश्चैव ववान्यथिवीपते॥ प्रह्लादो मूषिकादश्च तथैव जनमेजयः॥ पता
किनो मंडलिनः फणावंतश्च सर्वशः॥ एते चान्ये च बहवः सर्पास्तस्यां युधिष्ठिर॥ उपासते महात्मानं व
रुणं विगतक्लमाः॥ बलिर्वैरोचनो राजा नरकोद्दवान्यतिः॥ प्रह्लादो विप्रचित्तिश्च कालखंजाश्च सर्वशः॥
सहनुर्दुर्मुखः शंखः सुमनाः सुगतिः स्वनाः॥ घटोदरो महापार्श्वः क्रथनिः पिठरस्तथा॥ विश्वरूपः सु
रूपश्च विरूपोथ महाशिराः॥ दशग्रीवश्च वाली च मेघवासा दशावरः॥ टिट्टिभो विटभूतश्च प्रह्लादश्चें
द्रतापनः॥ दैत्यदानवसंघाश्च सर्वे रुचिरकुंडलाः॥ स्रग्विणो मालिनः सर्वे तथा दिव्यपरिच्छदाः॥ ९४
सर्वे लब्धवराः शूराः सर्वे विगतमृत्यवः॥ ते तस्यां वरुणं देवं धर्मपाशधराः शुभाः॥ उपासते म
हात्मानं सर्वे सुमतिनः सदा॥ तथा समुद्राश्चत्वारो नदी भागीरथी च या॥ कालिंदी विमला चित्रा कावेरी

च सरिद्वरा॥ विपाशा च शतद्रुश्च चंद्रभागा सरस्वती॥ इरावती वितस्ता च सिंधुर्देवनदस्तथा॥ गोदावरी कृष्णवे
णी नर्मदा वेगवाहिनी॥ एताश्चान्याश्च राजेंद्र सुतीर्था लोकविश्रुताः॥ सरितः सर्वतश्चान्याः सुतीर्थानि सरांसि
च॥ कूपाश्च सप्रस्रवणा देहवंतो युधिष्ठिर॥ पल्वलानि तडागानि देहवंत्यथ भागशः॥ दिशः सर्वा मही चैव त
था सर्वे महीधराः॥ उपासते महात्मानं सर्वे जलचरास्तथा॥ गीतवादित्रवंतश्च गंधर्वाप्सरसां गणाः॥ स्तुवंतो व
रुणं देवं तस्यामेव मुपासते॥ महीधरा रत्नवंतो रसायां च प्रतिष्ठिताः॥ सर्वे विग्रहवंतश्च तमीश्वरमुपासते॥ ए
षा मया संपतता वारुणी भरतर्षभ॥ दृष्टपूर्वा सभा रम्या कुबेरस्य सभां शृणु॥ २८॥ ॥ इति श्री महाभारते सभापर्व
णि वरुणसभावर्णनं नाम नवमोध्यायः॥ ॥ नारद उवाच॥ ॥ सभा वैश्रवणी राजन् शतयोजनमायता॥ वि
स्तीर्णा सप्ततिश्चैव योजनानि सितप्रभा॥ तपसा निर्मिता राजन्स्वयं वैश्रवणेन ही॥ शशिप्रभा च सा राजन्कैलासशि
खरोपमा॥ गुह्यकैरुह्यमानासा खेविषक्तेव दृश्यते॥ दिव्यहेममयैरुच्चैः पादपैरुपशोभिता॥ रश्मीवती भास्वरा
च दिव्यगंधा मनोरमा॥ सिताभ्रशिखराकारा प्लवमानेव दृश्यते॥ दिव्याहेममयैरंगैर्विद्युद्भिरिव राजते॥ तस्यां
वैश्रवणो राजा विचित्राभरणांबरः॥ स्त्रीसहस्रैर्वृतः श्रीमानास्ते ज्वलितकुंडलः॥ दिवाकरनिभे पुण्ये दिव्यास्त

१८ रजसंस्कृते ॥ दिव्यपादपधानेन च निषतः परमासने ॥ मंदारपारिजातानां वनानि स्फुरभीणि च ॥ सौगंधिका-
नां चादाय गंधान्गंधवहः शुचिः ॥ नलिन्याः अलकाख्यायाः नंदनस्य वनस्य च ॥ मनोहृदयसंह्लादी वायुस्तमु-
पसेवते ॥ तत्र देवाः सगंधर्वा गणैरप्सरसां वृताः ॥ दिव्यमानेषु गीतानि गायंति यत्र भारत ॥ मिश्रकेशी
च रंभा च चित्रसेना शुचिस्मिता ॥ चारुनेत्रा घृताची च तथैव च तिलोत्तमा ॥ विश्वाचि च सहजन्या मेनका
पुंजकस्थला ॥ प्रम्लोचाप्युर्वशी चैव इडा चित्रा विभावरी ॥ नंदा च सौरभद्रा च सामची बुद्बुदा नंदा ॥ एता सह-
स्रशश्चान्यान्नृत्यगीतविशारदाः ॥ उपातिष्ठंत धनदं गंधर्वाप्सरसां गणाः ॥ अनेकगीतवादित्रैर्नसेगिरितैः
श्च सा सभा ॥ अनंन्या रुचिरा भाति गंधर्वाप्सरसां गणैः ॥ किंनरा नाम गंधर्वा नरा नाम तथापरे ॥ मणिभद्रोथ
धनदश्वेतभद्रश्च गुह्यकः ॥ कसेरुको गंडकुंडः प्रद्योतश्च महाबलः ॥ कस्तुंबुरुः पिशाचश्च गजकर्णो विशा- १५
लकः ॥ वाराहकर्णः शौष्ठः फलकक्षः फलोदकः ॥ अंगचूडः शिरावर्तः हेमनेत्रो विभीषकः ॥ पुष्पाननः पिं-
गलकः शोणितोदः प्रवालकः ॥ वृक्षद्स्यानिकेतश्च चीरवासाश्च भारत ॥ एते चान्ये च बहवो यक्षाः शत-
सहस्रशः ॥ सदा भगवती च श्रीस्तथैव नलकूबरः ॥ अहं च नित्यशः स्तस्यां भवंत्यन्ये च मद्विधाः ॥ आचा-

र्याश्चाभवंस्तत्र तथा देवर्षयोपरे ॥ मेदा मांसाशनेनुग्रैः उग्रधन्वा महाबलः ॥ उपासते महात्मानो तस्मां नित्यं ज-
नेश्वरः ॥ भगवान्भूतसंघैश्च वृतः शतसहस्रशः ॥ उमापतिः पशुपतिः शूलभृद्भगनेत्रहा ॥ त्र्यंबको राजशा-
र्दूल देवी भगवती च या ॥ वामनैर्विकटैः कुब्जैः क्षतजाक्षैर्मनोहरैः ॥ मांसमेदावसाहारैरुग्रश्रवणदर्शनैः ॥ ना-
नाप्रहरणैर्घोरैर्वातैरिव महाजवैः ॥ वृतः सहायस्तत्रास्ते तथैव धनदोन्तपः ॥ सा सभा तादृशी राजन्
मया दृष्टांतरिक्षगा ॥ पितामहसभां दिव्यां कथयिष्ये गतक्लमा ॥ २८ ॥ ॥ इति श्री महाभारते सभापर्वणि
कुबेरसभावर्णनं नाम दशमोध्यायः ॥ ॥ नारद उवाच ॥ ॥ पुरा देवयुगे राजन् आदित्यो भगवान्दिवः ॥
आगमन्मानुषं लोकं दिदृक्षुर्विगतक्लमः ॥ चरन्मानुषरूपेण सभां दृष्ट्वा स्वयंभुवः ॥ सभामकथयद्दिव्यां मह्यं तत्वे-
न पांडव ॥ अप्रमेयप्रभां दिव्यां मानसीं भरतर्षभ ॥ अनिर्देश्यां प्रभावेन सर्वभूतमनोरमां ॥ श्रुत्वा गुणान-
हं तस्याः सभायाः पांडुनंदन ॥ दर्शनेप्सुः स्तदा राजन् आदित्यमहमब्रुवन् ॥ भगवन्द्रष्टुमिच्छामि पितामहस-
भामहं ॥ येन सा तपसा शक्या कर्मणा वापि गोपते ॥ औषधैर्वा तथा युक्तैरुत्तमा पापनाशिनी ॥ तन्ममाचक्ष्व
भगवन्पश्येयं तां सभां कथं ॥ स तन्मम वचः श्रुत्वा सहस्रांशुर्दिवाकरः ॥ प्रोवाच भरतश्रेष्ठ व्रतं वर्षसहस्रि-

स.भा.
१८

कं॥ ब्रह्मन्न व्रतमुपासत्वं निमिषं मनोनुतरात्मना॥ ततोऽहं हिमवत्पृष्ठे समारब्धो महाव्रतं॥ ततः स भगवान्सूर्यो मामु
पादाय वीर्यवान्॥ आगच्छत्तां सभां ब्राह्मीं विपाप्मां विगतक्लमां॥ एवं रूपेति सा शक्या न निर्देष्टुं जनाधिप॥ क्षणेन हि
बिभर्त्यन्यदनिर्देश्यं वपुस्तथा॥ न वेद परिमाणं वा संस्थानं चापि पांडव॥ न च रूपं मया तादृग्दृष्टपूर्वं न च श्रु
तं॥ सुसुखा सा सभा राजन्न शीता न च घर्मदा॥ न क्षुत्पिपासा ग्लानिर्वा प्राप्य तां प्राप्नुवंत्युत॥ नानारूपैः कृ
ता सा तु सुविचित्रैः सुभास्वरैः॥ स्तंभैर्न विधृता सा तु शाश्वती न च सा क्षरा॥ अति चंद्रं च सूर्यं च शिखिनं
च स्वयंप्रभा॥ दीप्यते नाकपृष्ठस्था भर्त्सयंतीव भास्करं॥ यस्यां स भगवानास्ते विदधद्देवमायया॥ स्व
यमेकोऽनिशं राजन्लोकान्लोकपितामहः॥ उपतिष्ठंति चाप्येनं प्रजानां पतयः प्रभुं॥ दक्षः प्रचेताः पुलहो म
रीचिः कश्यपस्तथा॥ भृगुरत्रिर्वसिष्ठश्च गौतमोऽथ तथांगिराः॥ मनोंतरिक्षं विद्याश्च वायुस्तेजो जलं मही॥
शब्दः स्पर्शस्तथा रूपं रसो गंधश्च भारत॥ प्रकृतिश्च विकारश्च यच्चान्यत्कारणं भुवः॥ पुलस्त्यः पुलहः क्र १८
तुः प्रह्लादः कर्दमस्तथा॥ अथर्वांगिरसश्चैव वालखिल्या मरीचयः॥ अगस्त्यश्च महातेजा मार्कंडेयश्च वी
र्यवान्॥ जमदग्निर्भरद्वाजः संवर्तश्च्यवनस्तथा॥ दुर्वासाश्च महाभाग ऋष्यशृंगश्च धार्मिकः॥ सनत्कुमारो

भगवान्योगाचार्यो महातपाः॥ असितो देवलश्चैव जैगीषव्यश्च तत्त्ववित्॥ ऋषभो जितशत्रुश्च महावीर्यो महा
मणिः॥ आयुर्वेदस्तथाष्टांगो देहवांस्तत्र भारत॥ चंद्रमाः सह नक्षत्रैरादित्यश्च गभस्तिमान्॥ वायवः क्रतवश्चैव
संकल्पः प्राण एव च॥ एते चान्ये च बहवः स्वयंभुवमुपासते॥ अर्थो धर्मश्च कामश्च हर्षो द्वेषस्तपो दमः॥
आयांति तस्यां सहिता गंधर्वाप्सरसस्तथा॥ विंशतिः सप्त चान्ये लोकपालाश्च सर्वशः॥ शुक्रो बृहस्पतिः
श्चैव बुधोंऽगारक एव च॥ शनैश्चरश्च राहुश्च ग्रहाः सर्वे तथैव च॥ मंत्रो रथंतरश्चैव हरिमान्वसुमानपि॥
आदित्याः साधिराजानो नामद्वंद्वैरुदाहृताः॥ मरुतो विश्वकर्मा च वसवश्चैव भारत॥ तथा पितृगणाः स
=ह= र्वे सर्वाणि च हवींष्यथ॥ ऋग्वेदः सामवेदश्च यजुर्वेदश्च पांडव॥ अथर्ववेदश्च तथा पर्वाणि च विशांपते॥
इतिहासोपवेदाश्च वेदांगानि च सर्वशः॥ ग्रहा यज्ञाश्च सोमश्च देवताश्चापि सर्वशः॥ सावित्री दुर्गतरणी
वाणी सप्तविधा तथा॥ भाष्याणि तर्कयुक्तानि देहवंति विशांपते॥ क्षणा लवा मुहूर्ताश्च दिवा रात्रिस्त
थैव च॥ अर्धमासाश्च मासाश्च ऋतवः षट्च भारत॥ संवत्सराः पंचयुगमहोरात्राश्चतुर्विधाः॥ कालच

सभा
१७

ऋं च दिव्यं चानित्यमक्षयमव्ययं॥ अदितिर्दितिर्दनुश्चैव सुरसा विनता इला॥ कालिका सुरसा देवी सरमा
या च गौतमी॥ आदित्या वसवो रुद्रा मरुतः सर्व एव च॥ विश्वेदेवाश्च साध्याश्च मरुतश्च मनोजवाः॥ राक्ष
साश्च पिशाचाश्च दानवा गुह्यकास्तथा॥ सुवर्णा नागमुनयः पितामहमुपासते॥ देवो नारायणस्तस्यां
तथा देवर्षयश्च ये॥ मुनयो वालखिल्याश्च योनिजायोनिजास्तथा॥ यच्च किंचित्त्रिलोकेऽस्मिन्दृश्यते
स्थाणु जंगमं॥ सर्वं तस्यां मया दृष्टं तद्विद्धि मनुजाधिप॥ अष्टाशीतिसहस्राणि यतीनामूर्ध्वरेतसां॥
प्रजावतां च पंचाशदृषीणामपि पांडव॥ ते स्म तत्र यथाकामं दृष्ट्वा सर्वे दिवौकसः॥ प्रणम्य शिरसा
तस्मै प्रतियांति यथागतं॥ अतिथीन्नागतान्देवो दैत्यान्नागान्मुनीस्तथा॥ यक्षान्सुपर्णान्कालेयान्गांधर्वा
प्सरसस्तथा॥ महाभागानमितधीर्ब्रह्मा लोकपितामहः॥ दयावान्सर्वभूतेषु यथार्थं प्रतिपद्यते॥ प्रति
गृह्य च भूतात्मा स्वयंभूरमितप्रभः॥ सांत्वमानार्थसंयोगैर्युनक्ति वसुधाधिप॥ तथा तैरुपयातैश्च प्र १७
तियातैश्च भारत॥ आकुला सा सभा तत्र भवति स्म सुखप्रदा॥ सर्वतेजोमयी दिव्या ब्रह्मर्षिगणभावनी॥
ब्राह्म्या श्रिया दीप्यमाना सुशुभा विगतक्लमा॥ सा सभा तादृशी दृष्टा सर्वलोकेषु विश्रुता॥ सभेयं राजशार्दूल

=हरी=

मनुष्येषु तथा तव॥ एता मया दृष्टपूर्वाः सभा देवेषु भारत॥ तवेयं मानुषे लोके सर्वश्रेष्ठतमा सभा॥ ॥ युधि
ष्ठिर उवाच॥ ॥ प्रायशो राजलोकस्ते कथितो वदतां वर॥ वैवस्वतसभानियं यथा वदसि मे प्रभो॥ वैवस्वत
सभायां वै नागास्ते कथिताः प्रभो॥ दैत्येंद्राश्चैव भूयिष्ठाः सरितः सागरास्तथा॥ तथा धनपतेर्यक्षा गुह्यका रा
क्षसास्तथा॥ गंधर्वाप्सरसश्चैव भगवांश्च वृषध्वजः॥ पितामहसभायां ते कथिताश्च महर्षयः॥ सर्वे दे
वनिकायाश्च सर्वशास्त्राणि चैव हि॥ शक्रस्य तु सभायां तु देवाः संकीर्तिता मुने॥ उद्देशाश्च गंधर्वा विचि
त्राश्च महर्षयः॥ एवमुक्तस्तु राजर्षिः हरिश्चंद्रो महामुने॥ कथितस्ते सभायां वै देवेंद्रस्य महात्मनः॥ किं कर्म ते
नचरितं तपो वा नियतव्रत॥ येनासौ सह शक्रेण स्पर्धते सुमहातपाः॥ पितृलोकगतश्चापि कथितस्तु पिता
मम॥ दृष्टः पांडुर्महाभागः कथं वापि समागतः॥ किमुक्तवान्स भगवान्नेतदिच्छामि वेदितुं॥ त्वत्तः श्रोतुं महत्स
र्वं परं कौतूहलं हि मे॥ ॥ नारद उवाच॥ ॥ यन्मां पृच्छसि राजेंद्र हरिश्चंद्रं प्रति प्रभो॥ तत्तेऽहं संप्रवक्ष्यामि मा
हात्म्यं तस्य धीमतः॥ तेनैकरथमास्थाय जेतुं हेमविभूषितं॥ जिताः शस्त्रप्रतापेन द्वीपाः सप्त नरेश्वर॥ स

सभा १८ विजित्य मंहीं सर्वां सशैलवनकाननां ॥ आजहार महाराज राजसूयं महाक्रतुं ॥ तस्य सर्वे महीपाला धनान्याजह्रुरा
ज्ञया ॥ द्विजानां परिवेषारस्तस्मिन्यज्ञे च ते भवन् ॥ प्रादाच्च द्रविणं प्रीत्या याजकेभ्यो नरेश्वरः ॥ यथा कृतस्य
तेनुक्त्वा ततः पंचगुणाधिकं ॥ ततः पर्याप्तविविधैर्वसुभिर्ब्राह्मणास्तदा ॥ प्रदानकाले संप्राप्ते नानादिग्भ्यः
समागतान् ॥ भक्ष्यभोज्यैश्च विविधैर्यथाकामपुरस्कृतैः ॥ धनौघैस्तर्पितस्तस्य तुष्टैर्द्विजैश्च समुदाहृतं ॥ तेजस्वी
च यशस्वी च नृपेभ्योभ्यधिकोभवत् ॥ एतस्मात्कारणात्पार्थ हरिश्चंद्रो विराजते ॥ तेभ्यो राजसहस्रेभ्यस्तद्वि
द्धि भरतर्षभ ॥ समाप्य च हरिश्चंद्रो महायज्ञं प्रतापवान् ॥ अभिषिक्तश्च शुशुभे साम्राज्येन नराधिपः
॥ ये चान्येपि महीपाला राजसूयं यथा क्रतुं ॥ यजंते ते महेंद्रेण मोदंते सह भारत ॥ तपसा ये च तीव्रेण त्यज
तीह कलेवरं ॥ ते पि तत्स्थानमासाद्य श्रीमंतो यांति नित्यशः ॥ पिता च त्वाह कौरव्य पांडुः कौरवनंदन ॥ हरिश्चं
द्रे श्रियं दृष्ट्वा नृपतो जातविस्मयः ॥ समर्थोसि महीं जेतुं भ्रातरस्ते वशानुगाः ॥ राजसूयं क्रतुश्रेष्ठमाहरस्वे १८
ति भारत ॥ तस्य त्वं पुरुषव्याघ्र संकल्पं कुरु पांडव ॥ गंतारस्ते महेंद्रस्य पूर्वैः सह सलोकतां ॥ बहुविघ्नश्च न

नृपते क्रतुरेष स्मृतो महान् ॥ छिद्राण्यत्र हि वांछंति यज्ञघ्ना ब्रह्मराक्षसाः ॥ युद्धं च तत्र शमनं पृथिवीक्षयकार
कं ॥ किंचिदेव निमित्तं च भवत्यत्र क्षयावहं ॥ एतत्संचिंत्य राजेंद्र यत्क्षमं तत्समाचर ॥ अप्रमत्तोत्थितो नित्यं चातुर्वर्ण्य
स्य रक्षणे ॥ एवं भव स्वमोदस्व दानैस्तर्पय तद्द्विजान् ॥ एतत्ते विस्तरेणोक्तं यन्मां त्वं परिपृच्छसि ॥ आपृच्छे त्वां गमिष्यामि दा
शार्हनगरीं प्रति ॥ ॥ वैशंपायन उवाच ॥ ॥ एवमाख्याय पार्थेभ्यो नारदो भगवानृषिः ॥ जगाम ते परिवृतो ऋ
षिभिर्यैः समागतः ॥ गते तु नारदे पार्थो भ्रातृभिः सह कौरव ॥ राजसूयं क्रतुश्रेष्ठं चिंतयामास भारत ॥ ६३ ॥ ॥
इति श्री महाभारते सभापर्वणि ब्रह्मसभावर्णनं नामैकादशोध्यायः ॥ ॥ वैशंपायन उवाच ॥ ॥ ऋषेस्तद्वचनं श्रुत्वा
महिमानं महात्मनां ॥ यज्वनां कर्मभिः पुण्यैर्लोकप्राप्तिं समीक्ष्य च ॥ हरिश्चंद्रं च राजर्षिं रोचमानं विशेषतः ॥ यज्वानं यज्ञ
माहर्तुं राजसूयमियेष सः ॥ युधिष्ठिरस्ततः सर्वानर्चयित्वा सभासदः ॥ प्रत्यर्चितश्च तैः सर्वैर्यज्ञायैव मनो दधे ॥ भूयश्चा
द्भुतवीर्यौजा धर्ममेवानुचिंतयन् ॥ किं हितं सर्वलोकस्य भवेदिति मनो दधे ॥ अनुगृह्णन्प्रजाः सर्वाः सर्वधर्मविदां वरः ॥ राज
सूयं प्रति तदा पुनः पुनरपृच्छत ॥ अविशेषेण सर्वेषां हितं चक्रे युधिष्ठिरः ॥ एवं गते ततस्तस्मिन्पितरीवाश्वसंज्ज
नाः ॥ न तस्य विद्यते द्वेष्टा ततोस्याजातशत्रुता ॥ स मंत्रिणः समानाय्य भ्रातॄंश्च वदतां वरः ॥ राजसूयं प्रति तदापृ

सभा १०

नः पुनरध्यगच्छत ॥ ते प्रोच्यमानाः सहितावचोर्थं मंत्रिणस्तदा ॥ युधिष्ठिरं महाराज यियक्षंतमिदमब्रुवन् ॥ ॥ मंत्रि
णऊचुः ॥ ॥ येनाभिषिक्तो नृपतिर्वारुणं गुणमृच्छति ॥ तेन राजापि तं कृत्स्नं सम्राड्गुणमभिप्सति ॥ तस्य संम्राड्गु
णार्हस्य भवतः कुरुनंदन ॥ राजसूयस्य समयं मन्यंते समयस्तव ॥ तस्य यज्ञस्य समयः स्वाधीनः क्षत्रसंपदा ॥ सा
म्नाषडग्नयः स्तस्मिश्चीयंते ब्रह्मवादिभिः ॥ दर्विहोमानुपादाय सर्वान्यः प्राप्नुते क्रमात् ॥ अभिषेकं च यज्ञांते सर्व
जितेन चोच्यते ॥ समर्थोसि महाबाहो सर्वे तव वशागा वयं ॥ अविचार्य महाराजन् राजसूये मनः कुरु ॥ इत्येवं सुहृदः सर्वे
पृथक्च सह चाब्रुवन् ॥ स धर्म्यं पांडवः स्तेषां वचः श्रुत्वा विशांपते ॥ धृष्टमिष्टं वरिष्ठं च जग्राह मनसारिहा ॥ श्रुत्वा सुहृद
चस्तज्जजानंश्चाप्यात्मनः क्षमं ॥ पुनः पुनर्मनो दध्रे राजसूयाय भारत ॥ स भ्रातृभिः पुनर्धीमानृत्विग्भिश्च महा
त्मभिः ॥ मंत्रिभिश्चैव सहितो राजसूयं युधिष्ठिरः ॥ धौम्यद्वैपायनाद्यैश्च मंत्रयामास संमतः ॥ ॥ युधिष्ठिर उवा १०
च ॥ ॥ इयं या राजसूयस्य सम्राडर्हस्य सत्क्रतोः ॥ श्रद्धावानस्य वदतः स्पृहा मे सा कथं भवेत् ॥ ॥ वैशं
पायन उवाच ॥ ॥ एवमुक्तास्तत स्तेन राज्ञा राजीवलोचनः ॥ इदमूचुर्वचः काले धर्मराजं युधिष्ठिरं ॥ अर्हस्त्व
मसि धर्मज्ञ राजसूयं महाक्रतुं ॥ अथैवमुक्ते नृपतौ ऋत्विग्भिरृषिभिस्तथा ॥ मंत्रिणो भ्रातरश्चास्य तद्वचः प्र

त्यपूजयत ॥ स तु राजा महाप्राज्ञः पुनरेवात्मनात्मवान् ॥ भूयो विममृशे पार्थो लोकानां हितकाम्यया ॥ सामर्थ्ययोगं
संप्रेक्ष्य देशकालौ व्ययागमौ ॥ विमृश्य सम्यक् स्वधिया कुर्वन्प्राज्ञो न सीदति ॥ नहि यज्ञसमारंभः केवलात्मविपत्त
ये ॥ भवतीति समाज्ञाय यत्नतः कार्यमुद्वहन् ॥ सामर्थ्यमस्य कार्यस्य कृष्णमेव जनार्दनं ॥ सर्वलोकात्परं मत्वा जगा
म मनसा हरिं ॥ अप्रमेयं महाबाहुं कामाज्जातमजं नृषु ॥ पांडवस्तर्कयामास कर्मभिर्देवसंमितैः ॥ नास्य किंचिद
विज्ञातं नास्य किंचिदकर्मजं ॥ नास्य किंचिदविषह्यमिति कृष्णममन्यत ॥ स तु तां नैष्ठिकीं बुद्धिं कृत्वा पार्थो यु
धिष्ठिरः ॥ गुरुवद्गुरवे प्राहिणोद्दूतमंजसा ॥ शीघ्रगेन रथेनाशु स दूतः प्राप्य यादवान् ॥ द्वारकावासिनं कृष्णं द्वारव
त्यां समासदत् ॥ दर्शनाकांक्षिणं पार्थं दर्शनाकांक्षयाच्युतः ॥ इंद्रसेनेन सहित इंद्रप्रस्थं ययौ तदा ॥ व्यतीत्य विविधा
न्देशांस्त्वरावान्क्षिप्रवाहनः ॥ इंद्रप्रस्थगतं पार्थमभ्यगच्छज्जनार्दनः ॥ स गृहे पितृवद्भ्रात्रा धर्मराजेन पूजितः ॥ भीमेन च
ततोपश्यत्स्वसारं प्रीतिमान्पितुः ॥ प्रीतः प्रीतेन मनसा रेमे सह हितस्तदा ॥ अर्जुनेन यमाभ्यां च गुरुवत्पर्युपस्थितः ॥ तं वि
श्रांतं शुभे देशे क्षणिनं तल्पमाश्रितं ॥ धर्मराजः समागम्य ज्ञापयत्स्वप्रयोजनं ॥ प्रार्थितो राजसूयो मे न चासौ केवलेप्स
या ॥ प्राप्यते येन यत्तेन विदितं कृष्ण सर्वशः ॥ यस्मिन्सर्वं संभवतीयश्च सर्वत्र पूज्यते ॥ यश्च सर्वेश्वरो राजा राजसूयं स

स॰भा॰ विंदति॥ तं राजसूयं सुहृदः कार्यमाहुः समेत्य धीः॥ तत्र मे निश्चितं तमं तवकृष्ण गिरा भवेत्॥ केचिद्धि सौहृदादेव दोषं
१७ न परिचक्षते॥ स्वार्थहेतोस्तथैवान्ये प्रियमेव वदंत्युत॥ प्रियमेव परीप्संती केचिदात्मनि यद्धितं॥ एवं प्रायाश्च दृ
श्यंते जनवादाः प्रयोजने॥ त्वं तु हेतूनतीत्यैतान् कामक्रोधौ व्युदस्य च॥ परमं तत्क्षमं लोके यथावद्वक्तुमर्हसि
॥४०॥ ॥ इति श्रीमहाभारते सभापर्वणि राजसूयारंभे मंत्रे कृष्णाभिगमने नाम द्वादशोऽध्यायः॥ ॥ श्रीकृ
ष्ण उवाच॥ ॥ सर्वैर्गुणैर्महाराज राजसूयं त्वमर्हसी॥ जानतस्त्वेव ते सर्वं किंचिद्वक्ष्यामि भारत॥ जामदग्न्येन रामेण क्ष
त्रं तदवशेषितं॥ तस्मादवरजं लोके यदिदं क्षत्रसंज्ञितं॥ कृतोऽयं कुलसंकल्पः क्षत्रियैर्वसुधाधिप॥ निदेशवाग्भिस्तत्ते
ह विदितं भरतर्षभ॥ ऐडस्यैक्ष्वाकुवंशस्य प्रकृतिं परिचक्षते॥ राजानः श्रेणिबद्धाश्च तथान्ये क्षत्रिया भुवि॥ ऐडवंशा
श्च ये राजंस्तथैवेक्ष्वाकवो नृपाः॥ तानि चैकशतं विद्धि कुलानि भरतर्षभ॥ ययातेस्त्वेव भोजानां विस्तरो गुणतो
महान्॥ भजते च महाराज विस्तरः स चतुर्दिशं॥ तेषां तथैव तां लक्ष्मीं सर्वक्षत्रमुपासते॥ इदानीमेव वै राजा १७
जरासंधोऽभिषेचितः॥ स्थितो मूर्ध्नि नरेंद्राणां ओजसाक्रम्य सर्वशः॥ सोऽवनीं मध्यमां भुक्त्वा मिथोभेदममन्यत॥ प्रभु
र्यस्तु परो राजा यस्मिन्नेकवशीभवत्॥ स साम्राज्यं जरासंधः प्राप्तो भवति मानवः॥ तं च राजन्महाप्राज्ञ संश्रित्य किल सर्व
शः॥

शः॥ राजन्सेनापतिर्जातः शिशुपालः प्रतापवान्॥ तमेव च महाराज शिष्यवत्समुपासते॥ वक्रः करूषाधिपतिर्माया
योधी महाबलः॥ अपरौ च महावीर्यौ महात्मानं समाश्रितौ॥ जरासंधं महावीर्यं तं हंसडिभिकावुभौ॥ दंतवक्रः
करूषश्च करभो मेघवाहनः॥ मूर्ध्ना दिव्यं मणिं बिभ्रन्यमद्भुतमणिं विदुः॥ मुरं च नरकं चैव शास्ति यो यवनाधि
पो॥ अपर्यंतबलो राजा प्रतीच्यां वरुणो यथा॥ भगदत्तो महाराज वृद्धस्तव पितुः सखा॥ स वाचा प्रणतस्तस्य कर्म
णा चैव भारत॥ स्नेहबद्धश्च पितृवन्मनसा भक्तिमांस्त्वयी॥ प्रतीच्यां दक्षिणं चांतं पृथिव्याः पाति यो नृपः॥ मातुलो भवतो
राजा पुरुजित्कुंतिवर्द्धनः॥ स ते संनतिमानेकः स्नेहतः शत्रुतापनः॥ जरासंधं गतस्त्वेवं पुरा यो न मया हतः॥ पुरुषोत्तमवि
ज्ञातो योऽसौ चेदिषु दुर्मतिः॥ आत्मानं प्रतिलोकेऽस्मिन्ख्यापयति पुरुषोत्तमः॥ आदत्ते सततं मोहाद्यः स चिह्नं च मा
मकं॥ वंगपुंड्रकिरातेषु राजबलसमन्वितः॥ पौंड्रको वासुदेवेति योऽसौ लोकेषु प्रथितः॥ चतुर्थभाङ्महाराज भोज
इंद्रसखो बली॥ विद्याबलाद्यो व्यजयत्स पांड्यक्रथकैशिकान्॥ भ्राता यस्याहृतिः शूरो जामदग्न्यसमो युधि॥ स
भुक्ते मागधं राजा भीष्मकः परवीरहा॥ न कुलं न बलं राजन्नाभिषेकं तथात्मनः॥ पश्यमानो यशो दीप्तं जरासंध
मुपाश्रितः॥ उदीच्यभोजाश्च तथा कुलान्यष्टादश प्रभो॥ जरासंधभयादेव प्रतीचीं दिशमाश्रिताः॥ तथैव सर्वे पां

चालाः जरासंधभयार्दिताः॥ स्वराष्ट्रं संपरित्यज्य विद्रुताः सर्वतो दिशं॥ कस्यचित्त्वथ कालस्य कंसो निर्मथ्य बांधवान्॥
२१ बार्हद्रथस्कृते द्व्याः व भ्यागच्छतु मीतिः॥ अस्ति प्राप्तिश्च नाम्ना ते सहदेवानुजे बले॥ बलेन तेन संज्ञातीनभिभूय
चर्यामतिः॥ श्रैष्ठ्यं प्राप्तस्य तस्यासीद् तीवापनयो महान्॥ भोजराजन्य वृद्धैस्तु पीड्यमानो दुरात्मना॥ ज्ञातित्रा
णमभीप्सद्भिरस्माभिः संभावना कृता॥ दत्त्वाक्रूराय सुतनुं तां चाहुकसुतां तदा॥ संकर्षण द्वितीयेन ज्ञातिकार्यं कृतं
मया॥ हतौ कंससुनामानौ मया रामेण चाप्युभौ॥ भये च समतिक्रांते जरासंधे समुद्यते॥ मंत्रोयं मंत्रितो राजन् कु
रैरष्टादशैः परैः॥ अनारब्धं ततो विघ्नं तो महास्त्रैः शस्त्रपाणिभिः॥ न हन्याम वयं तस्य त्रिभिर्वर्षशतैर्बलं॥ दशचौ
ष्टौ च संग्रामा जरासंधस्य यादवाः॥ दद्दुर्न चैनं संग्रामे हंतुं शेकुर्महाबलाः॥ तस्य ह्यमरसंकाशौ बलेन बलिनां व
=श्री= रौ॥ नाम्नाहं सडिंभकौ विख्यातौ योधसत्तमौ॥ तावुभौ सहितौ वीरौ जरासंधश्च वीर्यवान्॥ त्रयः स्त्रयाणां लोका
नामपि पर्याप्ता इति मे मतिः॥ न हि केवलमस्माकं यावंतोन्ये विपार्थिवाः॥ तेषां वं तेषामासीच्च बुद्धिर्बुद्धिमतां
वर॥ अथ हंस इति ख्यातः कश्चिदासीन्महान्नृपः॥ रामेण स हतो राजन् संग्रामेष्टादशावरे॥ हु॥ ततो हंसद २१
ति प्रोक्तमथ केनापि भारत॥ तच्छ्रुत्वा डिंभको राजन् यमुनांभस्यमज्जत॥ विना हंसेन लोकेस्मिन् नाहं जीवितु

मुत्सहे॥ इत्येतां मतिमास्थाय डिंभको निधनं गतः॥ तथा तु डिंभकं श्रुत्वा हंसः परपुरंजयः॥ प्रपेदे यमुनामेव
सोपि तस्यां न्यमज्जत॥ तौ स भूपा जरासंधः श्रुत्वा चोभौ निधनं गतौ॥ स्वपुरं शूरसेनाद्यैः प्रययौ भरतर्षभ॥ ततो व
यममित्रघ्न तस्मिन्प्रतिगते मधे॥ पुनरानंदिताः सर्वे मथुरायां वसामहे॥ यदा त्वभ्येत्य पितरं सा वै राजीवलोच
ना॥ कंसभार्या जरासंधं दुहिता मागधं नृपं॥ चोदयत्येव राजेंद्र पतिव्यसनदुःखिता॥ पतिघ्नं मे जहीत्येवं पुनः पु
नररिंदम॥ ततो वयं महाराज तं मंत्रं पूर्वमंत्रितं॥ संस्मरंतो विमनसो व्यपयाता नराधिप॥ पृथक्त्वेन तदा राजन् संभि
प्य महतीं श्रियं॥ प्रयाता स्मो भयात्तस्य सधनज्ञातिबांधवाः॥ इति संमंत्र्य सर्वे स्म प्रतीचीं दिशमाश्रिताः॥ कुशस्थ
लीं पुरीं रम्यां रैवतेनोपशोभितां॥ ततो निवेशं तस्यां च कृतवंतो वयं प्रभो॥ तथैव दुर्गसंस्कारं देवैरपि दुरासदं॥ स्त्रि
योपि तस्यां युध्येयुः किं पुनर्वृष्णिपुंगवाः॥ तस्यां वयममित्रघ्न निवसामोकुतोभयाः॥ आलोक्य गिरिश्रेष्ठं गतं माध
वीतीर्थमेव च॥ मागधं तपावृत्तमस्वा परां मुदमवाप्नुयां॥ एवं वयं जरासंधादर्दिताः कृतकिल्बिषाः॥ सामर्थ्यवंतं सं
बंधाद्भवंतं समुपाश्रिताः॥ त्रियोजनायतं सद्म त्रिस्कंधं योजनावधि॥ योजनांते ससंद्वारं विक्रमक्रमतोरणं॥
अष्टादशाक्षकैर्नद्धं क्षत्रियैर्युद्धदुर्मदैः॥ अष्टादश सहस्राणि भ्रातॄणां संति नः कुले॥ आहुकस्य शतं पुत्रा एकैक

स०प

२२ स्त्रिरात्राह्वरा॥ चारुदेष्णः सह भ्रात्रा बभ्रुदेवःससात्यकिः॥ अहं च रौक्मिणेयश्च सांबः शौरिः समो युधि॥ एवमेते रथाः सप्त राज
न्नन्यान्निबोध मे॥ कृतवर्मा अनाधृष्टिः श्यामकः समितिंजयः॥ बद्रः शंकुर्निदांतश्च सप्त चैते महारथाः॥ पुत्रौ चांधकराज
स्य वृद्धो राजा च ते दश॥ लोकसंहनना वीरा वीर्यवंतो महाबलाः॥ स्मरंतो मध्यमं देशं वृष्णिमध्ये व्यवस्थिताः॥ स त्वं सम्राड्गु
णैर्युक्तः सदा भारतसत्तम॥ क्षत्रेः साम्राज्यमात्मानं कर्तुमर्हसि भारत॥ न तु शक्यं जरासंधे जीवमाने महाबले॥ राजसू
यस्त्वया प्राप्तुमेषा राजन्मतिर्मम॥ तेन रुद्धा हि राजानः सर्वे जित्वा गिरिव्रजे॥ कंदरे पर्वतेंद्रस्य सिंहेनेव महाद्विपाः॥ स हि रा
जा जरासंधो यियक्षुर्वसुधाधिपैः॥ महादेवं महात्मानं उमापतिमरिंदम॥ आराध्य तपसोग्रेण निर्जितास्तेन पार्थि
वाः॥ प्रतिज्ञायाश्च पारं स गतः क्षत्रियपुंगवः॥ स हि निर्जित्य निर्जित्य पार्थिवान्पार्थिवानागतान्॥ पुरमानीय बध्वा च चका
र पुरुषव्रजं॥ वयं चैव महाराज जरासंधभयात्तदा॥ मथुरां संपरित्यज्य गता द्वारावतीं पुरीं॥ यदि त्वेवं महाराज यज्ञं प्रा
प्तुमिहेच्छसि॥ यतस्व तेषां मोक्षाय जरासंधवधाय च॥ समारंभो हि शक्यो यं नान्यथा कुरुनंदन॥ राजसूयश्च कार्त्स्न्येन २२
कर्तुं मतिमतां वर॥ इत्येषा मे मती राजन्यथा वा मन्यसेऽनघ॥ एवं गते समाचक्ष्व स्वयं निश्चित्य हेतुभिः॥ ॥ इति श्री
महाभारते सभापर्वणि राजसूयमंत्रणे कृष्णवाक्यं नाम त्रयोदशोध्यायः॥१३॥ ॥ युधिष्ठिर उवाच॥ ॥छ॥

स्मिन्विशिष्टः केशवादृते॥ दानं दाक्ष्यं श्रुतं शौर्यं ह्रीः कीर्तिर्बुद्धिरुत्तमा॥ सन्नतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियता
च्युते॥ तमिमं सर्वसंपन्नमाचार्यं पितरं गुरुं॥ अर्च्यमर्चितमर्घार्हं सर्वे संमंतुमर्हथ॥ ऋत्विग्गुरुर्विवाह्यश्च स्नातको
नृपतिः प्रियः॥ सर्वमेतद्धृषीकेशस्तस्मादभ्यर्चितो मया॥ कृष्ण एव हि लोकानामुत्पत्तिः परिचाव्ययः॥ कृष्णस्य हि कृ
ते भूतमिदं विश्वं समर्पितं॥ एष प्रकृतिरव्यक्ता कर्ता चैव सनातनः॥ परं च सर्वभूतेभ्यस्तस्मात्पूज्यतमो
च्युतः॥ बुद्धिर्मनो महान्वायुस्तेजोंभः खं मही च या॥ चतुर्विधं च यद्भूतं सर्वं कृष्णे प्रतिष्ठितं॥ आदित्यश्चंद्र
मः श्चैव नक्षत्राणि ग्रहाश्च ये॥ दिशश्चापदिशश्चैव सर्वं कृष्णे प्रतिष्ठितं॥ अग्निहोत्रमुखा वेदा गायत्री छंद
सां मुखं॥ पर्वतानां मुखं मेरुः गरुडः पततां मुखं॥ ऊर्ध्वं तिर्यगधश्चैव यावती जगतो गतिः॥ सदेवकेषु लोके
षु भगवान्केशवो मुखं॥ अयं हि पुरुषो बालः शिशुपालो न बुध्यति॥ सर्वत्र सर्वदा कृष्णं तस्मादेवं प्रभाष
ते॥ यो हि धर्मं विचिनुयादुत्कृष्टं मतिमान्नरः॥ स वै पश्येद्यथा तत्त्वं न तथा चेदिराजयं॥ स वृद्धबालोष्वथवा

५३ पार्थिवेषु महात्मसु ॥ कोनार्हं मन्यते कृष्णं को वाप्येनं न पूजयेत् ॥ अथेमां दुष्कृतां पूजां शिशुपालो व्यवस्य
ति ॥ दुष्कृतानां तथान्यायं यथायं कर्तुमर्हति ॥ ३० ॥ ॥ इति श्रीमहाभारते सभापर्वणि भीष्मवाक्यं नाम
षट्त्रिंशोध्यायः ॥ ॥ वैशंपायन उवाच ॥ ॥ एवमुक्त्वा ततो भीष्मो विरराम महायशाः ॥ व्याजहारोत्तरं तत्र
सहदेवोर्थवद्वचः ॥ ॥ सहदेव उवाच ॥ ॥ केशवं केशिहंतारमप्रमेयपराक्रमं ॥ पूज्यमानो मया यो वः कृष्णं न सह
ते नृपाः ॥ सर्वेषां बलिनां मूर्ध्नि मयेदं सकलं पदं ॥ एवमुक्ते मया सम्यगुत्तरं प्रब्रवीतु सः ॥ मतिमंतश्च ये के
चिदाचार्यं पितरं गुरुं ॥ अर्च्यमर्चितमर्घार्हमनुजानंतु ते नृपाः ॥ ततो न व्याजहारैषां कश्चिद्बुद्धिमतां सतां ॥
मानिनां बलिनां राज्ञां मध्ये वै दर्शिते पदे ॥ ततोपतत्पुष्पवृष्टिः सहदेवस्य मूर्धनि ॥ अदृश्यरूपा वाचश्चाप्यब्रु
वुः साधु साध्विति ॥ अवध्यमजिनं कृष्णं भविष्यद्भूतजल्पकः ॥ सर्वसंशयनिर्मोक्ता नारदः सर्वधर्मवि ५३
त् ॥ तत्राहूतागताः सर्वे सुनीथप्रमुखा गणाः ॥ संप्राहृष्यंत संक्रुद्धा विवर्णवदनास्तदा ॥ युधिष्ठिराभिषेकं च

वासुदेवस्य चार्हणं ॥ अब्रुवंस्तत्र राजानो निर्वेदादात्मनिश्चयात् ॥ सुहृद्भिर्वार्यमाणानां तेषां हि वपुराबभौ
॥ आमिषादपकृष्टानां सिंहानामिव गर्जतां ॥ तं बलौघमपर्यंतं राजसागरमक्षयं ॥ कुर्वाणं समयं कृ
ष्णो युद्धाय बुबुधे तदा ॥ पूजयित्वा च पूजार्हं ब्रह्मक्षत्रविशेषवित् ॥ सहदेवो नृणां देवः समापयत कर्म तत्
त् ॥ तस्मिन्नभ्यर्चिते कृष्णे सुनीथः शत्रुतापनः ॥ अतिताम्रेक्षणः कोपादुवाच वसुधाधिपान् ॥ स्थितः
सेनापतिर्वोहं मन्यध्वं किन्नु सांप्रतं ॥ युधितिष्ठाम संनह्य समेतान्वृष्णिपांडवान् ॥ इति सर्वानुत्सा
र्य सर्वांस्तांश्चेदिपुंगवः ॥ यज्ञोपघाताय ततः सोमंत्रयत राजभिः ॥ ॥ इति श्रीमहाभारते सभापर्वणि स
प्तत्रिंशोध्यायः ॥ ॥ वैशंपायन उवाच ॥ ॥ ततः सागरसंकाशं दृष्ट्वा नृपतिसागरं ॥ संवर्तवाताभिहतं
भीमं क्षुब्धमिवार्णवं ॥ रोषात्प्रचलितं सर्वमिदमाह युधिष्ठिरः ॥ भीष्मं मतिमतां मुख्यं वृद्धं कुरुपिता
महं ॥ बृहस्पतिं बृहत्तेजाः पुरुहूत इवारिहा ॥ असौ रोषात्प्रचलितो महान्नृपतिसागरः ॥ अत्र यत्प्रतिपत्तव्यं

स॰प
५४

तन्मे ब्रूहि पितामह ॥ यज्ञस्याभिर्विघ्नकरं प्रजानां च हितं शिवं ॥ यथा सर्वं जनः श्रोत तथा ब्रूहि पितामह ॥ इत्यु
क्तवति धर्मज्ञे धर्मराजे युधिष्ठिरे ॥ उवाचेदं ततो भीष्मस्ततः कुरुपितामह ॥ मा भैषीस्त्वं तु कौंतेय श्वा सिं
हं हंतुमिच्छति ॥ शिवः पंथाः सुनीतोऽत्र मया पूर्वतरं वृतः ॥ प्रसुप्ते हि यथा सिंहे श्वानास्तत्र समागताः ॥ भषे
युः सहिताः सर्वे तथैमे वसुधाधिपाः ॥ वृष्णिसिंहस्य सुप्तस्य तथैमे प्रमुखे स्थिताः ॥ भषंते तात संक्रुद्धा
श्वानाः सिंहस्य संनिधौ ॥ नहि संबुध्यते यावत्सुप्तः सिंह इवाच्युतः ॥ तेन सिंहीकरोत्येतान्नृसिंहश्चेदिपुंग
वः ॥ पार्थिवान्पार्थिवश्रेष्ठः शिशुपालोऽल्पचेतनः ॥ सर्वान्सर्वात्मना तात नेतुं कामो यमक्षयं ॥ नूनमेत
त्समादातुं पुनरिच्छत्यधोक्षजः ॥ यदस्य शिशुपालस्य तेजस्तिष्ठति भारत ॥ विप्लुता चास्य भद्रं ते बुद्धिर्बुद्धि ५४
मतां वर ॥ चेदिराजस्य कौंतेय सर्वेषां च महीक्षितां ॥ आदातुं हि नरव्याघ्र यदीच्छति तथा ॥ चतुर्वि
धानां भूतानां त्रिषु लोकेषु माधवः ॥ प्रभवश्चैव सर्वेषां निधनं च युधिष्ठिर ॥ ॥ वैशंपायन उवाच ॥ ॥

उक्तस्त्वया बुद्धिमता यथावद्वक्तुमर्हसि ॥ संशयानां हि निर्मोक्ता त्वन्नान्यो विद्यते भुवि ॥ गृहे गृहे हि राजानः स्वस्यस्व
स्य प्रियंकराः ॥ न च साम्राज्यमाप्तास्ते सम्राट्शब्दो हि कृत्स्नभाक् ॥ कथं परानुभावज्ञः स्वं प्रशंसितुमर्हसि ॥ परेण
समवेतस्तु यः प्रशस्यः स पूज्यते ॥ विशाला बहुला भूमिर्बहुरत्नसमाचिता ॥ दूरं गत्वा विजानाति श्रेयो वृष्णिकु
लोद्वह ॥ शममेव परं मन्ये न तु मोक्षाद्भवेच्छमः ॥ आरंभेऽपरमे बुद्धिर्न प्राप्यमिति मे मतिः ॥ एवमेवाभिजानं
ति कुले जाता मनस्विनः ॥ कश्चित्कदाचिदेतेषां भवेच्छ्रेष्ठो जनार्दन ॥ ॥ भीमसेन उवाच ॥ ॥ अनारंभपरो रा
जा वाल्मीक इव सीदति ॥ दुर्बलश्चानुपायेन बलिनं योऽधितिष्ठति ॥ अतंद्रितस्तु प्रायेण दुर्बलो बलिनं रिपुं ॥ जये
त्सम्यक्प्रयोगेण नीत्यार्थानात्मनो हितान् ॥ कृष्णे नयो मयि बलं जयः पार्थे धनंजये ॥ मागधं साधयिष्यामो इष्टिं
त्रय इवाग्नयः ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आरंभेऽर्थपरो बालो नानुबंधमवेक्षते ॥ तस्मादरिं न मृष्यंति बालमर्थ
पराजनं ॥ जित्वा पराश्च नापावनाच्चः पालनाच्च भगीरथः ॥ कार्तवीर्यस्तपोयोगाद्बलात्तु भरतो विभुः ॥ बुद्ध्यामरु
त्तिमान्ये च सम्राडिति मनक्रमः ॥ सर्वानन्यानतु प्राप्तास्त्वमेव महाद्युते ॥ निग्राह्यलक्षणं प्राप्तो धर्मार्थनयलक्ष
णैः ॥ बार्हद्रथो जरासंधस्तद्विद्धि भरतर्षभ ॥ न चैनमनुरुध्यंते कुलान्येकशतं नृपाः ॥ तस्मादेतद्बलादेव साम्रा

स॰ प॰ ऽपकुर्वंस्तेस्मृतः॥ रत्नभाजो हि राजेभ्यो जरासंधमुपाहरत्॥ आदत्तेन च नो दृष्टो भागः पुरुषतः क्वचित्॥ एवं सर्वान्वशे चक्रे
२३ जरासंधः शतावरान्॥ तद्दुर्बलतरो राजा कथं पार्थमुपैष्यति॥ प्रोक्षितानां प्रमृष्टानां राज्ञां पशुपतेर्गृहे॥ पशूनामिव
का प्रीतिर्जीविते भरतर्षभ॥ क्षत्रियः शस्त्रमरणो यदा भवति सत्कृतः॥ ततः स्म मागधं संख्ये प्रतिबाधेम यद्वयं॥
षडशीतिः समानीताः शेषा राज्ञां चतुर्दश॥ जरासंधेन राजानः स्ततः क्रूरं प्रवर्त्स्यति॥ प्राप्नुयात्स यशो दीप्तं तत्र यो
विघ्नमाचरेत्॥ जयेद्यश्च जरासंधं स सम्राण्नियतो भवेत्॥ २१॥ ॥ इति श्री महाभारते सभापर्वणि राजसू
यमंत्रे कृष्णवाक्यं नाम चतुर्दशोऽध्यायः॥ ॥ युधिष्ठिर उवाच॥ ॥ साम्राज्यमी। प्सता लोकस्तु कथं स्वार्थम
पानुजौ॥ निदर्शनीयो कालस्य जरासंधस्य संयुगे॥ भवान्मे यदि नः प्राणा आत्मा च मम मानद॥ भीमार्जुनो उभौ
नेत्रे इति मन्ये जनार्दन॥ मनश्चक्षुर्विहीनस्य कीदृशं जीवितं भवेत्॥ जरासंधबलं प्राप्य दुःप्रापं भीमदर्शनं॥
भ्रमो हि नः पराजय्यात् किमुत त्वं विचेष्टितं॥ अस्मिन्नर्थे निरायुक्तो ऽनर्थो मे प्रतिपद्यते॥ यथाहं विमृशाम्येक २३
स्तत्तावच्छ्रूयतां मम॥ संन्यासं रोचये साधु कार्यस्यास्य जनार्दन॥ प्रतिहन्ति मनो मेद्य राजसूयो दुराहरः॥ ॥
वैशंपायन उवाच॥ ॥ पार्थः प्राप्य धनुःश्रेष्ठमक्षय्यौ च तथेषुधी॥ रथं ध्वजं सभां चैव युधिष्ठिरमभाषत॥ ध

नुरस्त्रं शरा वीर्यं पक्षो भूमिर्यशो बलं॥ प्राप्तमेतन्मया राजन् दुःप्राप्यं यदभीप्सितं॥ कुले जन्म प्रशंसंति विद्वांसः साधु
विनिश्चिताः॥ बलेन सदृशं नास्ति वीर्यं तु मम रोचते॥ कृतवीर्यकुले जातो निर्वीर्यः किं करिष्यति॥ निर्वीर्येपि
कुले जातो वीर्यवांस्तु प्रशस्यते॥ क्षत्रियः सर्वथा राजन्यस्य वृत्तिः पराजये॥ सर्वैरपि गुणैर्हीनो निर्वीर्यः किं करिष्य
ति॥ गुणीभूता गुणाः सर्वे तिष्ठंति हि पराक्रमे॥ जयस्य हेतुः सिद्धिर्हि कर्म दैवं हि संमतं॥ संयुक्तो हि बलैः कश्चित्प्रमादान्नो
पयुज्यते॥ तेन द्वारेण शत्रुभ्यः क्षीयते सबलो रिपुः॥ दैन्यं यथा बलवति तथा मोहो बलान्विते॥ तावुभौ नाशकौ हेतू
राज्ञा त्याज्यौ जयार्थिना॥ जरासंधवधं चैव राज्ञां परिरक्षणं॥ यदि कुर्याम यज्ञार्थं किं ततः परमं भवेत्॥ अनारं
भे तु नियतो भवेद्गुणविनिश्चयः॥ गुणान्निःसंशयाद्राजन्नैर्गुण्यं मन्यसे कथं॥ काषायं सुलभं पश्चान्मुनीनां सं
गमिच्छतां॥ साम्राज्यं तु भवेच्छक्तो वयं योत्स्यामहे परैः॥ ॥ इति श्री महाभारते सभापर्वणि राजसूयमंत्रे अर्जु
नवाक्यं नाम पंचदशोऽध्यायः॥ ॥ श्रीभगवानुवाच॥ ॥ जातस्य भारते वंशे तथा कुंत्याः सुतस्य च॥ या वै युक्ता
मतिः सेयमर्जुनेन प्रदर्शिता॥ न मृत्योः समयं विद्मः रात्रौ वा यदि वा दिवा॥ न चापि कंचिदमरमयुद्धेनापि शुश्रुम॥

स॰प एतावदेव पुरुषैः कार्यं हृदयतोषणं॥ नयेन विधिदृष्टेन यदुपक्रमते परान्॥ अनयस्यानयस्य संयोगे परमं क्रमः॥
२४ संशयो जायते तस्मात्साम्यं च न तयोर्द्वयोः॥ ते वयं नतमास्थाय शत्रुदेहसमीपगाः॥ कथमंतं न गच्छामो वृक्षस्येव नदी
रयाः॥ पररंध्रं पराक्रांताः स्वरंध्रावरणे स्थिताः॥ व्यूढानीकैरनुबलैर्नोपेयाद्बलवत्तरं॥ इति नीतिमतां बुद्धिस्तन्मे
=रो= मातीव रोचते॥ अनवद्या ह्यसंबुद्धाः प्रविष्टाः शत्रुसद्म तत्॥ शत्रुदेहमुपाक्रम्य तं कामं साधयामहे॥ एको ह्येव श्रियं
नित्यं बिभर्ति पुरुषर्षभ॥ अंतरात्मेव भूतानां तत्क्षयो वै बलक्षयः॥ अथ तं न निहन्याजौ शेषेष्वपि समाहताः॥ प्रा
प्नुयाम ततः स्वर्गं ज्ञातित्राणपरायणाः॥ ॥ युधिष्ठिर उवाच॥ ॥ कृष्ण कोयं जरासंधः किंवीर्यः किंपराक्रमः॥ प
स्पृष्ट्वाग्निसदृशं न दग्धः शलभो यथा॥ ॥ श्रीकृष्ण उवाच॥ ॥ शृणु राजन्जरासंधो यद्वीर्यो यत्पराक्रमः॥ यथा चो
पेक्षितोस्माभिर्बहुशः कृतविप्रियः॥ अक्षौहिणीनां तिसृणामासीत्समरदर्पितः॥ राजा बृहद्रथो नाम मगधाधिपतिः प
तिः॥ रूपवान्वीर्यसंपन्नः श्रीमानतुलविक्रमः॥ नित्यं दीक्षाकृशतनुः शतक्रतुरिवापरः॥ तेजसा सूर्यसदृशः २४
क्षमया पृथिवीसमः॥ यमांतकसमः कोपे श्रिया वैश्रवणो यथा॥ तस्याभिजनसंपन्नैर्गुणैर्भरतसत्तम॥ व्या
प्तेयं पृथिवी सर्वा सूर्यस्येव गभस्तिभिः॥ स काशिराजस्य सुते यमजे भरतर्षभ॥ उपयेमे महावीर्यो रूपद्रवि

=बृ=५

णसंमते॥ तयोश्चकार समयं मिथः स पुरुषर्षभः॥ नातिवर्तिष्य इत्येवं पत्नीभ्यां संनिधौ तदा॥ स ताभ्यां शुशुभे राजा पत्नीभ्यां
मनुजाधिप॥ गंगायमुनयोर्मध्ये मूर्तिमानिव माधवः॥ विषयेषु प्रसक्तस्य तस्य यौवनमभ्यगात॥ न च वंशकरः पुत्रस्तस्या
जायत कश्चन॥ मंगलैर्बहुभिर्होमैः पुत्रकामाभिरिष्टिभिः॥ नाससाद नृपश्रेष्ठः पुत्रं कुलविवर्धनं॥ अथ काक्षीवतः पु
त्रं गौतमस्य महात्मनः॥ शुश्राव तपसि श्रांतमुदारं चंडकौशिकं॥ यदृच्छोपगतः स्तत्र वृक्षमूलमुपाश्रितः॥ परितुष्टास्मि
ते राजन्वरं वरय सुव्रत॥ ततः सभार्यः प्रणतः तमुवाच बृहद्रथः॥ पुत्रदर्शननैराश्याद्बाष्पगद्गदया गिरा॥ भगवन्राज्यमु
त्सृज्य प्रस्थितस्य तपोवनं॥ किं वरेणाल्पभाग्यस्य किं राज्येनाप्रजस्य मे॥ ॥ श्रीकृष्ण उवाच॥ ॥ एतच्छ्रुत्वा मुनिर्ध्यानम
गमत्क्षुभितेंद्रियः॥ तस्यैव चाम्रवृक्षस्य छायायां समुपाविशत्॥ तस्योपविष्टस्य मुनेरुत्संगे निपपात ह॥ अवातम
शुकादष्टमेकमाम्रफलं किल॥ तत्प्रगृह्य मुनिश्रेष्ठो हृदयेनाभिमंत्र्य च॥ राज्ञे ददावप्रतिमं पुत्रसंप्राप्तिकारकं॥ उवा
च च महाप्राज्ञस्तं राजानं महामुनिः॥ गच्छ राजन्कृतार्थोसि निवर्तस्व जनाधिप॥ यथासमयमाज्ञाय तदा स नृपसत्तमः॥ द्वा
भ्यामेकं फलं प्रादात्पत्नीभ्यां भरतर्षभ॥ ते तदाम्रं द्विधाकृत्वा भक्षयामासतुः शुभे॥ भावित्वादपि चार्थस्य सत्यवाक्या
त्तथा मुनेः॥ तयोः समभवद्गर्भः फलप्राशनसंभवः॥ ते च दृष्ट्वा नरपतिः परां मुदमवाप ह॥ अथ काले महाप्राज्ञः य
थासमयमागते॥ प्रजायेतामुभे राजन्शरीरशकले तदा॥ एकाक्षिबाहुचरणे अर्धोदरमुखस्फिजे॥ दृष्ट्वा शरीरशकले

स॰प
२५

ते तु जाते सकृद्दुःखिते ॥ तयोर्द्वयोः सुसंवीते ते कृत्वा गर्भसंप्लवे ॥ निर्गम्यांतःपुरद्वारात्समुत्सृज्याभ्युजग्मतुः ॥ ते चतु
ष्पथनिक्षिप्ते जरा नामाथ राक्षसी ॥ जग्राह मनुजव्याघ्र मांसशोणितभोजना ॥ कर्तुकामा सुखवहे शकले सा तु राक्ष
सी ॥ संघट्टयामास तदा विधानबलचोदिता ॥ ते समानीतमात्रे तु शकले पुरुषर्षभ ॥ एकमूर्तिकृते वीरः कुमारः स
मपद्यत ॥ ततः सा राक्षसी राजन्विस्मयोत्फुल्ललोचना ॥ न शशाक समुद्वोढुं वज्रसारमयं शिशुं ॥ बालस्ताम्रतलं मुष्टिं कृत्वा
चास्ये निधाय सः ॥ प्राक्रोशदतिसंरब्धः सतोय इव तोयदः ॥ तेन शब्देन संत्रस्तः सहसांतःपुरजनः ॥ निर्जगाम नरव्या
घ्र सह राज्ञा परंतप ॥ ते च बाले परिम्लाने पयःपूर्णपयोधरे ॥ निराशे पुत्रलाभाय सहसैवाभ्यगच्छतां ॥ ते च दृष्ट्वा
तथाभूते राजानं चेष्टसंततिं ॥ तं च बालं च बलिनं चिंतयामास राक्षसी ॥ नार्हामि विषये राज्ञो चरंती पुत्रगृद्धिनः ॥ बालं
पुत्रमुपादातुं मेघलेखेव भास्करं ॥ सा कृत्वा मानुषं रूपमुवाच मनुजाधिपं ॥ बृहद्रथ सुतस्तेयं मद्दत्तः प्रतिगृह्य
तां ॥ तव पत्न्योर्द्वयोर्जातो द्विजातिवरशासनात् ॥ धात्रीजनपरित्यक्तो मयायं परिरक्षितः ॥ ततस्ते भरतश्रेष्ठ काशि २५
राजसुते शुभे ॥ तं बालमभिपत्याशु प्रस्नवैरभिषिंचतीं ॥ ततः स राजा संहृष्टः सर्वं तदुपलभ्य च ॥ अपृच्छन्नवहेमा
भां राक्षसीं तां जराभिधां ॥ का त्वं कमलगर्भाभे मम पुत्रप्रदायिनी ॥ कामया ब्रूहि कल्याणि देवता प्रतिभासि मे ॥ ५१ ॥
इति श्रीमहाभारते सभापर्वणि राजसूयमंत्रणे जरासंसत्तिर्नाम षोडशोध्यायः ॥ ॥ राक्षस्युवाच ॥ ॥ ॥

जरा नामास्मि भद्रं ते राक्षसी कामचारिणी ॥ तव वेश्मनि राजेंद्र पूजिता न्यवसं सुखं ॥ साहं प्रत्युपकारार्थं चिंतयंत्यनि
शं तव ॥ तवेमे पुत्रशकले दृष्टवत्यस्मि धार्मिक ॥ संश्लेषिते मया देवात्कुमारः समपद्यत ॥ स संगृह्य कुमारं तं प्राविश
त्स्वगृहं नृपः ॥ तस्य बालस्य यत्कृत्यं तच्चकार प्रहृष्टवत् ॥ आज्ञापयच्च राक्षस्या मगधेषु महोत्सवं ॥ तस्य नामाक
रोत्तत्र प्रजापतिसमः पिता ॥ जरया संधितो यस्माज्जरासंधो भवत्वयं ॥ सोवर्द्धत महातेजा मगधाधिपतेः सुतः ॥
प्रमाणबलसंपन्नो हुताहुतिरिवानलः ॥ कस्यचित्त्वथ कालस्य पुनरेव महातपाः ॥ मगधानुपचक्राम भगवांश्चंडकौशिकः ॥
तस्यागमनसंतुष्टः सामात्यः सपुरःसरः ॥ सभार्यः सह पुत्रेण निर्जगाम बृहद्रथः ॥ पाद्यार्घ्याचमनीयैस्तमर्चया
मास भारत ॥ स नृपो राज्यसहितं पुत्रं चास्मै न्यवेदयत् ॥ प्रतिगृह्य च तां पूजां पार्थिवाद्भगवानृषिः ॥ उवाच माग
धं तत्र प्रहृष्टेनांतरात्मना ॥ सर्वमेतन्मया राजन्विज्ञातं ज्ञानचक्षुषा ॥ पुत्रस्तु शृणु राजेंद्र यादृशोयं भविष्यति ॥ अस्य
रूपं च सत्वं च बलमूर्जितमेव च ॥ एष श्रिया समुदितः पुत्रस्तव न संशयः ॥ प्रापयिष्यति तत्सर्वं विक्रमेण समन्वितः ॥
अस्य वीर्यबले तेजो नानुयास्यंति मानवाः ॥ पततो वैनतेयस्य गतिमन्ये यथा खगाः ॥ देवैरपि विसृष्टानि शस्त्रा
ण्यस्य महीपते ॥ न भयं जनयिष्यंति गिरेरिव नदीरयाः ॥ सर्वमूर्द्धाभिषिक्तानामेष मूर्ध्नि ज्वलिष्यति ॥ सर्वेषां निष्प्र

स॰ भाप॰ भक्तो ज्योतिषामिव भास्करः ॥ एनमासाद्य राजानः समृद्धबलवाहनाः ॥ विनाशमुपयास्यंती शलभा इव पावकं ॥ एष श्रियं तत्र
ज्वलितां सर्वराज्ञां ग्रहीष्यति ॥ वर्षास्विवोद्धतजला नदीभिर्व नदीपतिः ॥ एष धारयिता सम्यक् चातुर्वर्ण्यं महाबलः ॥ शुभा
२८ शुभमिव स्फीता सर्वा सस्यधरा धरा ॥ अमुष्य वशगाः सर्वे भविष्यंति नराधिपाः ॥ सर्वभूतात्मभूतस्य वायोरिव शरीरिणः
॥ एष भद्रं महादेवं त्रिपुरांतकरं हरं ॥ सर्वलोकेष्वतिबलः स्वयं द्रक्ष्यति मागधः ॥ एवं ब्रुवन्नेव मुनिः स्वकार्यमिव चिंत
यन् ॥ विसर्जयामास नृपं बृहद्रथमथारिहन् ॥ प्रविश्य नगरं चैव ज्ञातिसंबंधिभिर्वृतः ॥ अभिषिच्य जरासंधं माग
धाधिपतिं तदा ॥ बृहद्रथो नरपतिः परां निर्वृतिमाययौ ॥ अभिषिक्ते जरासंधे तदा राजा बृहद्रथः ॥ पत्नीद्वयेनानु
गतः स्तपोवनमतोऽभवत् ॥ ततो वनस्थे पितरि मागधो त्रविशांपते ॥ जरासंधः स्ववीर्येण पार्थिवानकरोद्व
शे ॥ अथ दीर्घस्य कालस्य तेपोवनगतो नृपः ॥ सभार्यः स्वर्गमागम्य तपस्तप्त्वा बृहद्रथः ॥ ततस्तौ हंसडिभिका
वशास्त्रनिधनावुभौ ॥ मंत्रिमतिमतां श्रेष्ठौ सर्वशास्त्रविशारदौ ॥ यौ तौ मया ते कथितौ पूर्वमेव महाबलौ ॥ त्रयस्त्र २८
याणां लोकानां पर्याप्ता इति मे मतिः ॥ एवमेष तदा वीर बलिभिः कुरुकुरु राधकेः ॥ वृष्णिभिश्च महाराजन्नी । तिहे
तोरुपेक्षितः ॥ ३० ॥ इति श्री महाभारते सभापर्वणि राजसूये जरासंधोत्पत्तिकथनं नाम सप्तदशोऽध्यायः ॥ ॥

श्रीकृष्ण उवाच ॥ ॥ पतितौ हंसडिंभकौ सामात्यौ विनिपातितौ ॥ जरासंधस्य निधने कालोऽयं समुपागतः ॥ न शक्यो
ऽसौ रणे जेतुं सर्वैरपि सुरासुरैः ॥ प्राणयुद्धेन जेतव्यः स इत्युपलभामहे ॥ मयि नीतिर्बलं भीमे रक्षिता चावयोऽ
र्जुनः ॥ मागधं साधयिष्यामो इष्टिं त्रय इवाग्नयः ॥ त्रिभिरासादितोऽस्माभिर्विजने स नराधिपः ॥ न संदेहो यथा
युद्धमेकेनाप्युपयास्यति ॥ अवमानाच्च लोकस्य व्यायतत्वाच्च धर्षितः ॥ भीमसेनेन युद्धं स ध्रुवमभ्युपयास्य
ति ॥ अलं तस्य महाबाहो भीमसेनो महाबलः ॥ लोकस्य समुदीर्णस्य निधनायांतको यथा ॥ यदि ते हृदयं वेत्ति
यदि ते प्रत्ययो मयि ॥ भीमसेनार्जुनौ शीघ्रं न्यासभूतौ प्रयच्छ मे ॥ ॥ वैशंपायन उवाच ॥ ॥ एवमुक्तो भग
वता प्रत्युवाच युधिष्ठिरः ॥ भीमार्जुनौ समालोक्य संप्रहृष्टमुखौ स्थितौ ॥ अच्युताच्युत मा मैवं व्याहरामित्रक
र्षण ॥ पांडवानां भवान्नाथो भवंतं चाश्रिता वयं ॥ यथा वदसि गोविंद सर्वं तदुपपद्यते ॥ नहि त्वमग्रतस्तेषां
येषां लक्ष्मीः पराङ्मुखी ॥ निहतश्च जरासंधो मोक्षिताश्च महीक्षितः ॥ राजसूयश्च मे लब्धो निदेशे तव तिष्ठ
तः ॥ क्षिप्रकारिन्यथा त्वेतत्कार्यं समुपपद्यते ॥ मम कार्यं जगत्कार्यं तथा कुरु नरोत्तम ॥ त्रिभिर्विना न वर्तेऽहं
विना नाहं जीवितुमुत्सहे ॥ धर्मार्थकामरहितो रोगार्तश्च दुर्बलः ॥ न शौरिणा विना पार्थो न शौरिः पांडव

वं विना ॥ नत्वेदास्ति हि त्रैलोके स्मिन्कृष्ण यो रितिमे मतिः ॥ अयं च बलिनां श्रेष्ठः श्रीमानपि वृकोदरः ॥ युवाभ्यां
२८ सहितो वीरः किं न कुर्यां महायशाः ॥ सुप्रणीतो बलौघो हि कुरुते कार्यमुत्तमं ॥ अंधं जडं बलं प्राहुः प्रणेतव्यं विच
क्षणैः ॥ यतो हि निम्नं भवती नयती ह ततो जलं ॥ यत छिद्रं ततश्चापि नीयते धी वैर्बलं ॥ तस्मान्नयविधानज्ञं
पुरुषं लोकविश्रुतं ॥ पुरस्कुर्वीत कार्येषु कृष्णं कार्यार्थसिद्धये ॥ वयमाश्रित्य गोविंदं यतामः कार्यसिद्धये ॥ अथ
प्रज्ञान यबलं क्रियोपायसमन्वितं ॥ एवमेव यदुश्रेष्ठं पार्थः कार्यार्थसिद्धये ॥ अर्जुनः कृष्णमन्वेतु भीमो
न्वेतु धनंजयं ॥ नयो जयो बलं चैव विक्रमः सिद्धिमेष्यति ॥ ॥ वैशंपायन उवाच ॥ ॥ एवमुक्तास्ततः सर्वे भ्रात
रो विपुलौजसः ॥ वार्ष्णेयः पांडवौ चैव प्रतस्थुर्मागधं प्रति ॥ वर्चस्विनां ब्राह्मणानां स्नातकानां परिच्छदाः ॥ आच्छाद्य
सुहृदां वाक्यैर्मनोज्ञैरभिनंदिताः ॥ अमर्षादभितप्तानां ज्ञात्यर्थं मुख्यतेजसां ॥ रविसोमाग्निवपुषां भीममासी २८
त्तदा वपुः ॥ हतं मेने जरासंधं दृष्ट्वा भीमपुरोगमौ ॥ एककार्यसमुत्पन्नौ कृष्णौ युद्धे पराजितौ ॥ ईशौ हि तौ महात्मा
नौ सर्वकार्यप्रवर्तनौ ॥ धर्मार्थकामकार्याणां कार्याणामिव विग्रहे ॥ कुरुभ्यः प्रस्थितास्ते तु मध्येन कुरुजांगलं ॥

रम्यं पद्मसरो गत्वा कालकूटमतीत्य च ॥ गंडकीं च तलः शोणं शर्करावर्तमेव च ॥ एकपर्वतका नद्यः क्रमेणात्या
क्रमंतितेः ॥ संतीर्य शरयूं रम्यां दृष्ट्वा पूर्वांश्च कोशलान् ॥ अतीत्य जग्मुर्मिथिलां ततः श्चर्मण्वतीं नदीं ॥ सतीर्य गं
गां शोणं च त्रयस्ते प्राङ्मुखास्तदा ॥ ते तस्युर्वीतदा जग्मुर्मागधं क्षेत्रमच्युतः ॥ ते शश्वद्गोधनाकीर्णमंबुमं
तं शुभद्रुमं ॥ गोरथं गिरिमासाद्य ददृशुर्मागधं पुरं ॥ ॥ इति श्रीमहाभारते सभापर्वणि जरासंधवधे षोडशो
ध्यायः ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ एष पार्थ महान्भाति पशुमान्नित्यमंबुमान् ॥ निरामयः सुवेश्माढ्यो निवेशो मागधः
शुभः ॥ वैहारो विपुलः शैलो वराहो वृषभस्तथा ॥ तथैवर्षिगिरिस्तात शुभाश्चैत्यकपंचमः ॥ एते पंच महाशृंगाः प
र्वताः शीतलद्रुमाः ॥ रक्षंतीवाभिसंहत्य संहतांगा गिरिव्रजं ॥ पुष्पवेष्टितशाखाग्रैर्गंधवद्भिर्मनोरमैः ॥ निगूढा
इव लोध्राणां वनैः कामिजनप्रियैः ॥ शूद्रायां गौतमो यत्र महात्मा संशितव्रतः ॥ औशीनर्यामजनयत्काक्षीवादीन्सुता
न्दिषिः ॥ गौतमः कारणात्तस्माद् पासौ तेत्र वेश्मनि ॥ भजते मागधं वंशं स नृपाणामनुग्रहः ॥ अंगवंगादयश्चैव रा
जानः सुमहाबलाः ॥ गौतमक्षयमभ्येत्य रमंते स्म पुरार्जुन ॥ वनराजीस्तु पश्येमाः पिप्पलानां मनोरमाः ॥ लोध्राणां
च शुभाः पार्थ गौतमौकःसमीपजाः ॥ अर्बुदः शक्रवापी च पन्नगौ शत्रुतापनौ ॥ स्वस्तिकस्यालयश्चात्र मणिनाग

स॰ भा स्यचोत्तमः ॥ अपारिहार्या मेधानां मागधोयं मषोः कृते ॥ कौशिको मणिमांश्चैव ववृधाते ह्यनुग्रहं ॥ एवं प्रा
२८ प्यपरं रम्यं दुराधर्षं समंततः ॥ अर्थसिद्धिं त्वपरमां जरासंधोभिमन्यते ॥ वयमासादने तस्य दर्पमद्यापहन्महि ॥
॥ ॥ वैशंपायन उवाच ॥ ॥ एवमुक्त्वा ततः सर्वे भ्रातरो विपुलौजसः ॥ वार्ष्णेयः पांडवेयौ च प्रतस्थुर्मागधं पुरं ॥
तुष्टपुष्टजनोपेतं चातुर्वर्ण्यजनावृतं ॥ स्फीतोत्सवमनाधृष्यमासेदुश्च गिरिव्रजं ॥ तेथ द्वारमनासाद्य पुरस्य गि
रिमुच्छ्रितं ॥ बार्हद्रथैः पूज्यमानं तथा नगरवासिभिः ॥ यत्र माषादमृषभमाससाद बृहद्रथः ॥ तं हत्वा मांसतो
लांश्च तिस्रो भेरीश्चकारह ॥ आनह्य चर्मणा तस्य स्थापयामास वै पुरे ॥ यत्र ताः प्राणदन्भेर्यो दिव्यपुष्पावचूर्णिताः ॥
मागधानां सुरुचिरं चैत्यकं तं समाद्रवन् ॥ शिरसीव समाघ्नंतो जरासंधजिघांसवः ॥ स्थिरं सुविपुलं शृंगं सुम
हांतं पुरातनं ॥ अर्चितं माल्यगंधैश्च सततं सुप्रतिष्ठितं ॥ विपुलैर्बाहुभिर्वीरास्तेभिहत्याभ्यपातयन् ॥ ततस्ते मा २८
गधं दृष्ट्वा पुरं तद्विविशुस्तदा ॥ एतस्मिन्नेव काले तु जरासंधः प्रतापवान् ॥ दीक्षितो नियमस्थो भूदुपवास
पराभवत् ॥ पर्यग्निं कुर्वश्च नृपं सह मंत्रिपुरोहितैः ॥ स्नातकव्रतिनस्ते तु बाहुशस्त्रा निरायुधाः ॥ युयुत्सवः प्रवि
विशुर्जरासंधेन भारत ॥ वीक्ष्यमाणा जनास्तेषां ददृशुः श्रियमुत्तमां ॥ स्फीतां सर्वगुणोपेतां सर्वकामसमृद्धिनीं ॥

तांतु दृष्ट्वा समृद्धिं वै वीथ्यां तस्यां नरोत्तमाः ॥ राजमार्गेण गच्छंतः कृष्णभीमधनंजयाः ॥ बलाद्गृहीत्वा माल्यानि मा
ल्यागारान्महाबलाः ॥ विरागवसनाः सर्वे स्रग्विणो मृष्टकुंडलाः ॥ निवेशनमथाजग्मुर्जरासंधस्य धीमतः ॥ गोवासमि
वपश्यंतः सिंहा हैमवता यथा ॥ शैलस्तंभनिभास्तेषां चंदनागुरुभूषिताः ॥ अशोभंत महाराज बाहवो बाहुशालिनां ॥
तां दृष्ट्वा द्विरदप्रख्यान् शालस्कंधानिवोद्गतान् ॥ व्यूढोरस्कान्मागधानां विस्मयः समजायत ॥ ते त्वतीत्य जना
कीर्णास्तिस्रः कक्ष्या नरर्षभाः ॥ अपद्वारेण राजानमुपतस्थुर्गतव्यथाः ॥ तान्पाद्यमधुपर्कार्हान्नावार्हान्सत्कृतिं
गतान् ॥ प्रत्युत्थाय जरासंध उपतस्थे यथाविधि ॥ उवाच चैनान्राजासौ स्वागतान्वस्त्विति प्रभुः ॥ तस्य ह्ये
तद्व्रतं राजन्बभूव किल विश्रुतं ॥ स्नातकान्ब्राह्मणान्प्राज्ञः श्रुत्वा स समितिंजयः ॥ अप्यर्धरात्रे नृपतिः प्रत्युद्
गच्छति भारत ॥ तांस्त्वपूर्वेण वेषेण दृष्ट्वा भारतसत्तम ॥ उपतस्थे जरासंधो विस्मितश्चाभवत्तदा ॥ ते तु दृष्ट्वैव रा
जानं जरासंधं नरर्षभाः ॥ इदमूचुरमित्रघ्ना सर्वे भरतसत्तम ॥ स्वस्त्यस्तु कुशलं राजन्निति सर्वे व्यवस्थिताः ॥
तं नृपं नृपशार्दूलाः प्रेक्ष्यमाणा नरर्षभाः ॥ तानब्रवीज्जरासंधस्तदा यादवपांडवान् ॥ आस्यतामिति राजेंद्र

२० ब्राह्मणा वयमसंवृतान्॥ अथोपविविक्ताः सर्वे ततः स्तेपु पुरुषर्षभाः॥ संप्रदीप्तास्त्रया लक्ष्म्या महीधर इवाग्नयः॥
तानुवाच जरासंधः सत्यसंधो नराधिपः॥ विगर्हमानः कौरव्यो वेषग्रहणकारणं॥ न स्नातकव्रता विप्रा बहि
र्माल्यानुलेपनाः॥ भवंतीति नृलोकेस्मिन्विदितं मम सर्वशः॥ ते यूयं पुष्पवंतश्च भुजैर्ज्याकृतलक्षणैः॥ बिभ्रतः
क्षात्रमोजश्च ब्राह्मण्यं प्रतिजानथ॥ एवं विरक्तवसना बहिर्माल्यानुलेपनाः॥ सत्यं वदत के यूयं सत्यं राजसु शो
भते॥ नेषा कृतिर्न वीर्यं च ब्राह्मणस्याविशेषतः॥ चैत्यकं च गिरेः शृंगं भित्वा किमुपसर्पथ॥ वदध्वं वाचि
वीर्यं च ब्राह्मणस्य विशेषतः॥ अद्वारेण प्रविष्टाः स्म निर्भया राजकिल्बिषात्॥ कर्म चैतद्विलिंगस्य किं
वोद्य समीक्षितं॥ एवं च मामुपस्थाय तस्मान्न विधिनार्हणं॥ प्रणीतं मे न गृह्णीत कार्यं किं चास्मदागमे॥
एवमुक्तस्ततः कृष्णस्तमुवाच महातपाः॥ स्निग्धगंभीरया वाचा वाक्यं वाक्यविशारदः॥ स्नातक २०
न व्रतिनो राजन्ब्राह्मणाः क्षत्रिया विशः॥ विशेषनियमाश्चैषामविशेषाश्च संत्युत॥ विशेषवांश्च सततं क्ष
त्रियाः श्रियमिच्छति॥ पुष्पवत्सु ध्रुवा लक्ष्मीः पुष्पवंतस्ततो वयं॥ क्षत्रियो बाहुवीर्यस्तु न तथा वाक्यवीर्य

वान्॥ अप्रगल्भं वचस्तस्य तस्माद्बार्हद्रथे कृतं॥ स्ववीर्यं क्षत्रियाणां च बाह्वोर्धाता न्यवेशयत्॥ तद्दिदृ
क्षसि चेद्राजन्द्रष्टास्यद्य न संशयः॥ अद्वारेण रिपोर्गेहं द्वारेण सुहृदो गृहं॥ प्रविशंति नरा धीरा द्वाराण्येतानि ध
र्मतः॥ कार्यवंतो गृहानेत्य शत्रुतो नार्हणं वयं॥ प्रतिगृह्णीमतद्बुद्धिरेतं नः शाश्वतं व्रतं॥ ५१॥ ॥ इति श्रीम
हाभारते सभापर्वणि जरासंधवधपर्वणि एकविंशोध्यायः॥ ॥ जरासंध उवाच॥ ॥ न स्मरेयं कदा वैरं कृतं यु
ष्माभिरच्युत॥ चिंतयन्न च पश्यामि भवतां प्रति वैकृतं॥ वैकृते वासति कथं मन्यध्वं मामनागसं॥ अरिं वै ब्रूत
मां विप्राः सतां समय एव हि॥ अथ ब्रुवत मां विप्राः सतां समय एव हि॥ अधर्मेण यथा साधु मनः समनुतप्यते॥
योनागसि प्रसृजति क्षत्रियोपि न संशयः॥ अतोन्यथाचरे लोके धर्मज्ञः सन्महाव्रतः॥ वृजिनां गतिमाप्नो
ति श्रेयांसि उपहंति च॥ त्रैलोक्ये क्षत्रधर्मो हि श्रेयान्वै साधुचारिणां॥ नान्यं धर्मं प्रशंसंति ये च धर्मविदो
जनाः॥ तस्य मेद्य स्थितस्येह स्वधर्मे नियतात्मनः॥ अनागसं प्रजानां च प्रमादादिव जल्पथ॥ श्रीकृ
ष्ण उवाच॥ ॥ कुलकार्यं महाराज कश्चिदेव कुलोद्वहः॥ वहते तस्य नियोगाद्वयमभ्युद्यतास्तव॥ त्वया

स॰प॰
३०

चोपहृता राजन् क्षत्रिया लोकवासिनः ॥ तदागः क्रूरमासाद्य मन्यसे किमनागसं ॥ राजा राज्ञः कथं सा
धून् हिंस्यान्नृपतिसत्तम ॥ तद्राज्ञः संनिगृह्य त्वं रुद्रायोपजिहीर्षसि ॥ अस्मांस्तदेनो गच्छेत त्वया बार्हद्रथ कृ
तं ॥ वयं हि शक्ता धर्मस्य रक्षणे धर्मचारिणः ॥ मनुष्याणां समालंभो न च दृष्टः कथंचन ॥ स कथं मानु
षैर्देवं यष्टुमिच्छसि शंकरं ॥ सवर्णो हि सवर्णानां पशुसंज्ञां करिष्यति ॥ कोन्य एवं यथा हि त्वं जरासं
ध वृथायते ॥ यस्यां यस्यामवस्थायां यद्यत्कर्म करोति यः ॥ तस्यां तस्यामवस्थायां तत्फलं समवाप्नुयात् ॥
ते त्वां ज्ञातिक्षयकरं वयमार्तानुसारिणः ॥ ज्ञातिवृद्धिनिमित्तार्थं विनियंतुमिहागताः ॥ नास्ति लोके
पुमानन्यः क्षत्रियेष्विति चैव यत् ॥ मन्यसे स च ते राजन् सुमहान्बुद्धिविप्लवः ॥ को हि जानन्नभिजनमा
त्मवान्क्षत्रियो यथा नृप ॥ नाविशेत्स्वर्गमतुलं रणानंतरमव्ययं ॥ स्वर्गं ह्येव समास्थाय रणयज्ञेषु दी ३०
क्षिताः ॥ यजंते क्षत्रिया लोकं तद्विद्धि मगधाधिप ॥ स्वर्गयोनिर्जयो राजन् स्वर्गयोनिर्महद्यशः ॥ स्वर्ग
योनिस्तपो युद्धे मार्गः सोऽव्यभिचारवान् ॥ एष ह्यैंद्रो गुणैर्नित्यं वैजयंतः समाहितः ॥ येनासुरान्परा

जित्य जगत्पाति शतक्रतुः ॥ स्वर्गमासाद्य तस्य स्याद्विग्रहो वै यथा तथा ॥ मागधैः स्वबलैः सैन्यैर्बाहुल्यबलदर्पितैः ॥
मावमंस्थाः परान्राजन् नास्ति वीर्यं नरे नरे ॥ समं तेजस्त्वया राजन् केवलं मनुजेश्वर ॥ यावदेव न संबुद्धं तावदेव भवे
त्तव ॥ विषह्यमेतदस्माकमतो राजन् ब्रवीमि ते ॥ जहि त्वं सदृशेष्वेव मानं दर्पं च मागध ॥ मा गमः ससुता
मात्यः सबलश्च यमक्षयं ॥ दंभोद्भवः कार्तवीर्य उत्तरश्च बृहद्रथः ॥ श्रेयसो ह्यवमत्येह विनेशुः सबला नृपाः ॥ मुमु
क्षमाणास्त्वत्तश्च न वयं ब्राह्मणा ध्रुवं ॥ शौरिरस्मि हृषीकेशो नृवीरौ पांडवाविमौ ॥ त्वामाह्वयामहे राजन् स्थिरो युध्य
स्व मागध ॥ मुंच वा नृपतीन्सर्वान्मा गास्त्वं वै यमक्षयं ॥ ७ जरासंध उवाच नाजितान्वै नरपतीनहं
माददे कांश्चन ॥ जितः कः पर्यवस्थाता कोत्र यो न जितो मया ॥ क्षत्रियस्यैतदेवाहुर्धर्म्यं कृष्णोपजीवनं ॥
विक्रम्य वशमानीय कामतो यत्समाचरेत् ॥ देवतार्थमुपाहृत्य राज्ञः कृष्ण कथं भयात् ॥ अहमद्य विमुच्ये
यं क्षात्रं व्रतमनुस्मरन् ॥ सैन्यं सैन्येन व्यूढेन एक एकेन वा पुनः ॥ द्वाभ्यां त्रिभिर्वा योत्स्येहं युगपत्पृथगे

वच॥ ॥वैशंपायनउवाच॥ ॥एवमुक्त्वाजरासंधः सहदेवाभिषेचनं॥ आज्ञापयत्तदाराजा युयुत्सुर्भीमकर्मभिः॥ सतौसेनापतीराजासस्मारपुरुषर्षभः॥ कौशिकं चित्रसेनंचतस्मिन्युद्धमुपस्थिते॥ तयोस्तेनामनीद्वीलोकेहंसेतिडिंभकेतिच॥ पूर्वंचकथितंपुंभिःन्नलोकेलोकविश्रुते॥ तंतुराजन्विभुःशौरीराजानंबलिनांवरं॥ स्मृत्वापुरुषशार्दूलः शार्दूलसमविक्रमः॥ सत्यसंधोजरासंधोभुविभीमपराक्रमः॥ भागमन्यस्यनिर्दिष्टं वध्यंभूमिपमुत्तमं॥ नात्मनात्मवतांश्रेष्ठः इयेषमधुसूदनः॥ ब्राह्मणाज्ञांपुरः स्कृत्यहंतुंहलधरानुजः॥३५॥ ॥इतिश्रीमहाभारतेसभापर्वणिजरासंधवधेविंशतितमोध्यायः॥ ॥वैशंपायनउवाच॥ ॥ततः स्तंनिश्चितात्मानं युद्धाययदुनंदनः॥ उवाचवाग्मीराजानंजरासंधमधोक्षजः॥ त्रयाणांकेनतेराजन्योद्धुं विचरते मनः॥ अस्मदन्यतमेनेह सज्जीभवतुकोयुधि॥ एवमुक्तः सकृष्णेनयुद्धंवव्रेमहाद्युतिः॥ कृतस्वस्त्ययनो नृपः ब्राह्मणेनतपस्विना॥ संहासद्यजरासंधः क्षत्रधर्ममनुस्मरन्॥ ३९
अवमुच्यकिरीटंस्वं केशान्समनुसृज्यच॥ उदतिष्ठज्जरासंधोवेलेवातीतइवार्णवः॥ उवाचमतिमान्रा

जाभीमंभीमपराक्रमं॥ भीमयोत्स्येत्वयासार्द्धं श्रेयसानिर्जितंवरं॥ क्षत्राद्दर्पेतोराजायंवालोयमनुचार्जुनः॥ एवमुक्त्वाजरासंधो भीमसेनमरिंदमं॥ प्रत्युद्ययौ महाराज शक्रंबलिरिवासुरः॥ ततः संमंत्र्यकृष्णेनकृतस्वस्त्ययनोबली॥ भीमसेनोजरासंधमाससादयुयुत्सया॥ ततः स्तौजरशार्दूलौ बाहुशस्त्रौ समीयतुः॥ वीरौपरमसंहृष्टावन्योन्यजयकांक्षिणौ॥ ततोरथभुजाघाताव्यग्रहाव्यग्रहास्तथा॥ आसीत्सभीमः संपातोवज्रपर्वतयोरिव॥ उभौपरमसंहृष्टौ बलेनातिबलावुभौ॥ अन्योन्यस्यांतरंप्रेप्सूपरस्परजयैषिणौ॥ तद्भीममुत्सार्यजनंयुद्धमासीदुपह्वरे॥ बलिनोः संयुगेराजन्वृत्रवासवयोरिव॥ प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः॥ आचकर्षतुरन्योन्यंजानुभ्याभिजघ्नतुः॥ व्यूढोरस्कौदीर्घभुजौ नियुद्धकुशलावुभौ॥ बाहुभिः समसज्जेतामायसैपरिघैरिव॥ कार्तिकस्यतुमासस्यप्रवृत्तंप्रथमेहनी॥ अनाहारंदिवारात्रमविश्रांतमवर्तत॥ एतद्वृत्तंत्रयोदश्यांसमवेतंमहात्मनोः॥ गात्रंगात्रेणसंपीड्य विश्रमोद्यगमद्दयोः॥ एवानामन्रतंकंच आप्यायतव

स-प कोदरः॥ चतुर्दश्यां निशायां तु संपृष्ठो मागधः क्लमं॥ तं राजानं तथा क्लांतं दृष्ट्वा राजं जनार्दनः॥ उवाच भी
३२ मकर्माणं भीमं संबोधयन्निव॥ क्लांतः शत्रुस्तु कौंतेय पीडनीयो जनाधिपः॥ सममेतेन युध्यस्व बाहु
भ्यां भरतर्षभ॥ एवमुक्तस्तु कृष्णेन पांडवः परवीरहा॥ जरासंधस्य यद्रंध्रं ज्ञात्वा चक्रे मतिं वधे॥ ततः
स्तमजितं जेतुं जरासंधं वृकोदरः॥ संरभ्य बलिनां श्रेष्ठो जग्राह कुरुनंदनः॥ २१॥ ॥ इति श्रीमहा
भारते सभापर्वणि जरासंधवधे एकविंशतिमोध्यायः॥ ॥ वैशंपायन उवाच॥ ॥ भीमसेनः स्ततः
कृष्णमुवाच यदुनंदनं॥ बुद्धिमास्थाय विपुलां जरासंधजिघांसया॥ नायं पापो मया कृष्ण युक्तः स्यादनुरो
धितुं॥ प्राणेन यदुशार्दूल बद्धः पाषाणवाससा॥ एवमुक्तस्तदा कृष्णः प्रत्युवाच वृकोदरं॥ त्वरयन्पुरुषव्या
घ्र जरासंधवधेप्सया॥ यत्ते दैवं परं सत्वं यत्स त्वं मातरिश्वनः॥ बलं भीम जरासंधे दर्शयस्व तदद्य नः॥ एव ३२
मुक्तस्तदा भीमो जरासंधमरिंदमः॥ उत्क्षिप्य भ्रामयामास बलवंतं महाबलः॥ भ्रामयित्वा शतगुणं भुजा
भ्यां भरतर्षभ॥ बभंज पृष्ठं संक्षिप्य निष्पिष्य विननाद च॥ तस्य निष्पिष्यमाणस्य पांडवस्य च गर्जतः॥

अभवत्तुमुलो नादः सर्वप्राणिभयंकरः॥ स वामपादं संक्षिप्य गृहीत्वा दक्षिणे पदे॥ द्विधा चकार तं पार्थो भीम
सेने महाबलं॥ वित्रेसुर्मागधाः सर्वे स्त्रीणां गर्भाश्च सुस्रवुः॥ भीमसेनस्य नादेन जरासंधस्य चैव हि॥ किंनु
स्याद्धिमवान्शक्षिप्तः किंनु स्याद्दीर्यते मही॥ इति स्म मागधा जज्ञुर्भीमसेनस्य निस्वनात्॥ ततो राजकुलद्वारी
प्रसुप्तमिव तं नृपं॥ रात्रौ परासुमुत्सृज्य निश्चक्रमुररिंदमाः॥ जरासंधरथं कृष्णो योजयित्वा पताकिनं॥ आ
रोप्य भ्रातरौ चैव मोक्षयामास बंधनं॥ ते वै रत्नभुजं कृष्णं रत्नार्हं पार्थिवीश्वराः॥ राजानः शक्रुरासाद्य मोक्षिता
महतो भयात्॥ अच्युतः शस्त्रसंपन्नो जितारिः सह राजभिः॥ रथमास्थाय तं दिव्यं निर्जगाम गिरिव्रजात्॥ यः स
सोदर्यवान्नाम द्वियोधः कृष्णसारथिः॥ अभ्यासघाती संदृश्यो दुर्जयः सर्वपार्थिवैः॥ भीमार्जुनाभ्यां योधाभ्यां
मास्थितः कृष्णसारथिः॥ शुशुभे रथवर्योसौ दुर्जयः सर्वराजभिः॥ शक्राविष्णू हि संग्रामे चेरतुस्तारकामये॥
रथेन तेन वै कृष्ण उपारुह्य ययौ तदा॥ तप्तचामीकराभेन किंकिणीजालमालिना॥ मेघनिर्घोषनादेन जैत्रे

33 पा।मित्रघातिना।।येनशक्रोथदेवानांजघाननवतीर्नव।।तंप्राप्यसमहृष्यंतरथंतेपुरुषर्षभाः।।ततःकृष्णंम
हाबाहुंभ्रातृभ्यांसहितंतदा।।रथस्थंमागधादृष्ट्वासमपद्यंतविस्मिताः।।यैरेदिव्यैःसमायुक्तोरथोवातस
मोजवे।।अधिष्ठितःसशुशुभेकृष्णेनातीवभारत।।असंगोदेवविहितस्तस्मिन्रथवरेध्वजः।।योजनाद्द
दृशेश्रीमानिंद्रायुधसमप्रभः।।चिंतयामासकृष्णोथगरुत्मंतंसचाभ्यगात्।।क्षणेनतस्मिन्सतेनासी
त्सरूपइवोच्छ्रितः।।व्यादितास्योमहानादःसहसत्वैर्ध्वजाश्रये।।तस्थौरथवरेतस्मिन्गरुत्मान्पन्नगाश
नः।।दुर्निरीक्ष्योहिभूतानांतेजसाभ्यधिकंबभौ।।आदित्यइवमध्याह्नेसहस्रकिरणावृतः।।नचैनसज्ज
तिवृक्षेषुशस्त्रैश्चापिनविध्यते।।दिव्योरथवरोराजन्दृश्यतेचैवमानुषैः।।तमास्थायरथंदिव्यंप
र्जन्यसमनिस्वनं।।निर्ययौपुरुषव्याघ्रःपांडवाभ्यांसहासहाच्युतः।।यंलेभेवासवाद्राजन्वसुस्त 33

वसुस्तस्माद्बृहद्रथः।।बृहद्रथात्क्रमेणैवततोबार्हद्रथोनृपः।।सनिर्ययौमहाबाहुःपुंडरीकेक्षणःप्रभुः।।गि
रिव्रजाद्बहिस्तस्थौसमदेशेमहायशाः।।तत्रैनंनागराःसर्वेसत्कारेणाभ्ययुस्तदा।।ब्राह्मणप्रमुखाराजन्
विधिदृष्टेनकर्मणा।।बंधनाद्विप्रमुक्ताश्चराजानोमधुसूदनं।।पूजयामासुरूचुश्चसामपूर्वमिदंव
चः।।नैतच्चित्रंमहाबाहोत्वयिदेवकिनंदन।।भीमार्जुनसमायुक्तेबलोपेतेधर्मस्यपरिपालने।।ज
रासंधह्रदेघोरेदुःखपंकेनिमज्जतां।।राज्ञांसमभ्युद्धरणंयदिदंकृतमेतद्यते।।विष्णोसमवपन्ना
नांगिरिदुर्गेसुदारुणे।।दिष्ट्यामोक्षाद्यशोदीप्तंमाप्ततेपुरुषोत्तम।।किंकुर्मःपुरुषव्याघ्रब्रूहिनः
पुरुषर्षभ।।कृतमित्येवतज्ज्ञेयंनृपैर्यद्यपिदुष्करं।।तानुवाचहृषीकेशःसमाश्वास्यमहामनाः।।यु
धिष्ठिरोराजसूयंक्रतुमाहर्तुमिच्छति।।तस्यधर्मप्रवृत्तस्यपार्थिवत्वंचिकीर्षतः।।सर्वैर्भवद्भिर्य

स०प
३४ कार्यंसाहाय्यंदीयतामिति॥ततस्तंप्रीतमनसस्तेनृपा भरतर्षभ॥तथेत्युक्त्वाकुरुस्सर्वेप्रतिगृह्यचतां
गिरं॥रत्नभागंचदाशार्हेददुस्तेपृथिवीश्वराः॥कृष्णाज्ञयाहुगोविंदस्तेषामेवानुकंपया॥जरासंधात्म
जश्चैवसहदेवोमहारथः॥निर्ययौसजनामात्यःपुरस्कृत्यपुरोहितं॥सनीचैःप्रश्रितोभूत्वाबहुरत्न
पुरोगमः॥सहदेवोमहाबुद्धिर्नृणांदेवमुपास्थितः॥भयार्त्तायततस्तस्मैकृष्णोदत्वाभयंतदा॥
आददेस्यमहार्हाणिरत्नानिपुरुषोत्तमः॥अभ्यषिंचततत्रैवजरासंधात्मजंनृपं॥गत्वैकत्वं
कृष्णेनपार्थाभ्यांचैवसत्कृतः॥विवेशराजमतिमान्पुनर्बार्हद्रथंपुरं॥कृष्णश्चसहपार्था ३४
भ्यांश्रियापरमयाज्वलन्॥रत्नान्यादायभूरीणिप्रययौपुष्करेक्षणः॥इंद्रप्रस्थमुपाग
म्यपांडवाभ्यांसहाच्युतः॥समेत्यधर्मराजानंप्रीयमाणोभ्यभाषत॥दिष्ट्याभीमेनबलवान्

जरासंधोनिपातितः॥राजानोमोक्षिताश्चैवबंधनान्नृपसत्तम॥दिष्ट्याकुशलिनौचेमौभीमसेनधनंजयौ॥
पुनस्स्वनगरंप्राप्तावक्षतावितिभारत॥ततोयुधिष्ठिरःकृष्णंपूजयित्वायथार्हतः॥भीमसेनार्जुनौचैवप्रहृष्टः
परिषस्वजे॥ततःक्षीणेजरासंधेभ्रातृभ्यांसहितंजयं॥अजातशत्रुरासाद्यमुमुदेभ्रातृभिःसह॥यथावयः
समागम्यराजभिःसहपांडवः॥सत्कृत्यपूजयित्वाचविससर्जनराधिपान्॥युधिष्ठिराभ्यनुज्ञातास्तेनृपाहृ
ष्टमानसाः॥जग्मुःस्वदेशांस्त्वरितायानैरुच्चावचैस्ततः॥एवंपुरुषशार्दूलोमहाबुद्धिर्जनार्दनः॥पांडवैर्घात
यामासजरासंधमरिंतदा॥घातयित्वाजरासंधंबुद्धिपूर्वमरिंदमः॥धर्मराजमनुज्ञाप्यपृथांकृष्णांचभारत॥
सुभद्रांभीमसेनंचफाल्गुनंयमजौतथा॥धौम्यमामंत्रयित्वाचप्रययौस्वांपुरींतदा॥तेनैवरथमुख्येन
तरुणादित्यवर्चसा॥धर्मराजाभिसृष्टेनदिव्येननादयन्दिशः॥ततोयुधिष्ठिरमुखाःपांडवाभरतर्ष
भ॥प्रदक्षिणमकुर्वंतकृष्णमक्लिष्टकारिणं॥ततोगतेभगवतिकृष्णेदेवकिनंदने॥जयंलब्ध्वासुविपुलं

३५ राजामभयदंतदा॥ संवर्द्धितोजयोभ्युदयः कर्मणातेनभारत॥ द्रौपद्याः पांडवाराजन्परांप्रीतिमवर्द्धयन॥ तस्मि
न्कालेतुयत्कर्म धर्मकामार्थसंहितं॥ तद्राजा धर्मतश्चक्रे राज्यपालनकीर्तनात॥ ॥इतिश्रीमहाभारतेस
भापर्वणिजरासंधवधोनामद्वाविंशतिमोध्यायः॥ ॥वैशंपायनउवाच॥ ॥पार्थः प्राप्यधनुःश्रेष्ठमक्ष
य्याचतथेषुधी॥ रथंध्वजंसभांचैवयुधिष्ठिरमभाषत॥ ॥अर्जुनउवाच॥ ॥धनुरस्त्रंशरावीर्यंपक्षोभू -य-
मीर्यशोबलं॥ प्राप्तमेतन्मयाराजन्दुःप्राप्यंयदभीप्सितं॥ तत्रकृत्यमहंमन्येकोशस्यास्यविवर्धनं॥
करमाहारयिष्यामीराज्ञः सर्वान्नृपोत्तम॥ विजयायप्रयास्यामीदिशंधनदरक्षितां॥ तिथावथमुहू
र्तेचनक्षत्रेचक्षणे तथा॥ धनंजयवचः श्रुत्वाधर्मराजोयुधिष्ठिरः॥ स्निग्धगंभीरयावाचातंगिरा ३५
प्रत्यभाषत॥ स्वस्तिवाच्यार्हतोविप्रान्प्रयाहिपुरुषर्षभ॥ दुर्हृदामप्रहर्षाय सुहृदांनंदनायच॥ विजय
स्तध्रुवंपार्थप्रियंकाममवाप्नुहि॥ इत्युक्तः सययौपार्थः सैन्येनमहतावृतः॥ अग्निदत्तेनदिव्येनरथे

नप्रययौतदा॥ तथैवभीमसेनोपीययौचपुरुषर्षभ॥ ससैन्याःप्रययुःसर्वेधर्मराजाभिपूजिताः॥ दिशं
धनपतेरिष्टामजयत्पाकशासनिः॥ भीमसेनस्तथाप्राचींसहदेवस्तुदक्षिणां॥ प्रतीचींनकुलोराजन्
दिशंव्यजयदस्त्रवित॥ खांडवप्रस्थमध्यास्तेधर्मराजोयुधिष्ठिरः॥ ॥जनमेजयउवाच॥ ॥दिशामभि
जयंब्रह्मन्विस्तरेणाभिवर्णय॥ नहितृप्यामिपूर्वेषांशृण्वानश्चरितंमहत॥ ॥वैशंपायनउ
वाच॥ ॥धनंजयस्यवक्ष्यामिविजयंपूर्वमेवतत॥ यौगपद्येनपार्थैर्हिविजितेयंवसुंधरा॥
पूर्वंकुलिंदविषयेवशेचक्रेमहीपतीन॥ धनंजयोमहाबाहुर्नातितीव्रेणकर्मणा॥ आनर्तान्कालकूटांश्च
कुलिंदांश्चविजित्यसः॥ सुमंडलंचापिजितंकृतवाननुसैनिकं॥ सतेनसहितोराजन्सव्यसाचीपरंतपः॥
विजिग्येशाकलंद्वीपंप्रतिविंध्यंचपार्थिवं॥ शाकलद्वीपवासाश्चसप्तद्वीपेचयेनृपाः॥ अर्जुनस्यचसै
न्यानांविग्रहस्तुमुलोभवत॥ सतानपिमहेष्वासोविजिग्येपुरुषर्षभः॥ तैरेवसहितैःसर्वैःप्राग्ज्योतिषमु

पाभ्ययत्॥ तत्र राजा महानासीद्भगदत्तो विशांपते॥ तेनासीत्सुमहद्युद्धं पांडवस्य महात्मनः॥ सकैराते
श्चचीनैश्चवृतः प्राग्ज्योतिषोभवत्॥ अन्यैश्चबहुभिर्योधैः सागरानूपवासिभिः॥ ततः सदिवसानष्टौयोध
यित्वा धनंजयं॥ प्रहसन्नब्रवीद्राजा संग्रामे विगतक्लमः॥ उपपन्नं महाबाहो त्वयि कौरवनंदन॥ पाक
शासनदायाद वीरमाहवशोभिनि॥ आसीत्सखा पुरंदस्य शक्रादनवमो रणे॥ न च शक्नोमि ते तात स्था
तुं प्रमुखतो युधि॥ किमीप्सितं पांडवेय ब्रूहि किं करवाणि ते॥ यद्वक्ष्यसि महाबाहो तत्करिष्यामि पुत्रक॥ ॥
॥ अर्जुन उवाच॥ कुरूणामृषभो राजा कुंतीपुत्रो युधिष्ठिरः॥ धर्मज्ञः सत्यसंधश्च यज्वा विपुलदक्षिणः॥
तस्य पार्थिवतामीप्सामि करः तस्मै प्रदीयतां॥ भवान्पितृसखा चैव प्रीयमाणो मयापि च॥ ततो नाज्ञा
पयामि त्वां प्रीतिपूर्वं प्रदीयतां॥ ॥भगदत्त उवाच॥ ॥कुंतीमातर्यथा मे त्वं तथा राजा युधिष्ठिरः॥ ३६
सर्वमेतत्करिष्यामि यथा वा भाषसेनघ॥२७॥ इति श्रीमहाभारते सभापर्वणि त्रयोविंशतिमोध्यायः॥

वैशंपायन उवाच॥ ॥ एवमुक्तः प्रत्युवाच भगदत्तं धनंजयः॥ अनेनैव कृतं सर्वं भविष्यत्यनुजानत॥ तं
विजित्य महाबाहुः कुंतीपुत्रो धनंजयः॥ प्रययावुत्तरां तस्माद्दिशं धनदपालितां॥ अंतर्गिरिं च कौंतेयः तथैव च
बहिर्गिरिं॥ तथोपरिगिरिं चैव विजिग्ये भरतर्षभ॥ विजित्य पर्वतान्सर्वान्ये च तत्र नराधिपाः॥ तान्वशे स्थाप
यित्वा स धनान्यादाय सर्वशः॥ तैरेव सहितः सर्वैरनुरज्य च तान्नृपान्॥ उलूकवासिनं राजन् बृहंतमभि
जग्मिवान्॥ मृदंगवरनादेन रथनेमिस्वनेन च॥ हस्तीनां च निनादेन कंपयन्वसुधामिमां॥ ततो बृहंतस्त
रुणो बलेन चतुरंगिणा॥ निष्क्रम्य नगरात्तस्माद्योधयामास पांडवं॥ सुमहान्सन्निपातोभूद्धनंजयबृ
हंतयोः॥ न शशाक बृहंतस्तु सोढुं पांडवविक्रमं॥ सोविषह्यतमं दृष्ट्वा कौंतेयं पर्वतेश्वरः॥ उपावर्तत दुर्मेधा
रत्नान्यादाय सर्वशः॥ स तत् राज्यमवस्थाप्य उलूकसहितो ययौ॥ सेनाबिंदुर्महाराज राज्यादाशु समाक्षिप
त्॥ मोदावरीं वामदेवं सुदामानं सुसंकुलं॥ उलूकानुत्तरांश्चैव तांश्च राज्ञः समानयत्॥ तत्रस्थः पुरुषैरेव

39 धर्मराजस्य शासनात्॥ व्यजयद्दिजयो राजन्देशानेतान्महारथः॥ सदिवःप्रस्थमासाद्य सेनाबिंदोः पदं म
हत॥ बलेन चतुरंगेण निवेशमकरोत्प्रभुः॥ स ततः परिवृतः सर्वैर्विष्वग्जित्सनराधिपः॥ अभ्यगच्छन्महा
तेजा पांडवं पुरुषर्षभं॥ विजित्य बहुविस्तारान् पार्वतीयान्महारथान्॥ ध्वजिन्या व्यजयद्राजन् पुरं पौर
वरक्षितं॥ पौरवं तु विनिर्जित्य दस्यून्पर्वतवासिनः॥ गणानुत्सवसंकेतानजयत्सप्त पांडवः॥ ततः का
श्मीरकान्वीरः क्षत्रियान्क्षत्रियर्षभः॥ व्यजयल्लोहितं चैव मंडलैर्दशभिः सह॥ ततस्त्रिगर्तान्कौंतेयो
दार्वान्कोकनदाश्च ये॥ क्षत्रिया बहवो राजन्नुपावर्तत सर्वशः॥ अभिसारीं ततो रम्यां विजिग्ये कुरुनं
दनः॥ उलूतवासिनं चैव रोचमानं महारणे॥ ततः सिंहपुरं रम्यं चित्रायुधसुरक्षितं॥ प्रमथ्य बलमास्था 39
य पाकशासनिराहवे॥ ततः सुह्मांश्च चोलांश्च किरीटी पांडवर्षभः॥ सहितः सर्वसैन्येन प्रमथ्य कुरुनंद
न॥ ततः परमविक्रांतो बाह्लीकान्सुमहाबलान्॥ महता परिमर्देन वशे चक्रे दुरासदान्॥ गृहीत्वा तु बलं सा

रं फल्गु चोत्सृज्य पांडवः॥ महांकदंबकांबोजान्ऋषीकानुत्तरानपि॥ सहितस्तान्महाराज व्यजयत्पाकशास
निः॥ ऋषिकेषु च संग्रामो बभूवातिभयंकरः॥ तारकामयसंकाशः परमर्षिकपार्थयोः॥ स विजित्य ततो राजन्न
ऋषीकान्रणमूर्धनि॥ शुकोदरसमप्रख्यान्हयानष्टौ समानयत्॥ स विनिर्जित्य संग्रामे हिमवंतं सनिष्कुटं॥
श्वेतपर्वतमासाद्य न्यवसत्पुरुषर्षभः॥ ॥ इति श्रीमहाभारते सभापर्वण्यर्जुनदिग्विजये चतुर्विंशतितमो
ध्यायः॥ ॥ वैशंपायन उवाच॥ ॥ स श्वेतपर्वतं वीरः समतिक्रम्य फाल्गुनः॥ देशं किंपुरुषावासं द्रुमपुत्रेण
रक्षितं॥ महता संनिपातेन क्षत्रियांतकरेण ह॥ व्यजयत्पांडवश्रेष्ठः करे चैवं न्यवेशयत्॥ तं जित्वा हाटकं नाम
देशं गुह्यकरक्षितं॥ पाकशासनिरव्यग्रः सहसैन्यः समासदत्॥ तांस्तु सांत्वेन निर्जित्य मानसं सर उत्तमं॥ ऋषिकु
ल्याश्च ताः सर्वा विजित्य कुरुनंदनः॥ सरो मानसमासाद्य हाटकानभितः प्रभुः॥ गंधर्वरक्षितं देशं व्यजयत्पां
डवस्ततः॥ तत्र तित्तिरिकल्माषान्मंडूकाख्यान्हयोत्तमान्॥ लेभे स करमत्यंतं गंधर्वनगरं तथा॥ उत्तरं ह

३८ रिवर्षं तु समासाद्य पांडवः॥ इयेष जेतुं तं देशं पाकशासननंदनः॥ ततएनं महाकाया महावीर्या महाबलाः॥ द्वा
रपालाः समासाद्य हृष्टा वचनमब्रुवन्॥ पार्थ नेदं त्वया शक्यं पुरं जेतुं कथंचन॥ उपावर्तस्व कल्याण पर्याप्तमि
दमक्षतं॥ इदं पुरं यः प्रविशेद्ध्रुवं स न भवेन्नरः॥ प्रीयामहे त्वया वीर पर्याप्तो विजयस्तव॥ न चात्र किंचिज्जेत
व्यमर्जुनात्र प्रदृश्यते॥ उत्तराः कुरवो ह्येते नात्र युद्धं प्रवर्तते॥ प्रविष्टस्त्वपि कौंतेय नेह द्रक्ष्यसि किंचन॥ न
हि मानुषदेहेन शक्यमत्राभिवीक्षितुं॥ यदीह पुरुषव्याघ्र किंचिदन्यच्चिकीर्षसि॥ तद्ब्रवीहि करिष्यामो वच
नंतव भारत॥ ततस्तानब्रवीद्राजन्नर्जुनः परवीरहा॥ पार्थिवत्वं चिकीर्षामि धर्मराजस्य धीमतः॥ न प्र
वेक्ष्यामि वोद्भुतं देशं वर्जितं यदि मानुषैः॥ युधिष्ठिराय यत्किंचित्करं तस्मै प्रदीयतां॥ ततो दिव्यानि व
स्त्राणि दिव्यान्याभरणानि च॥ मौक्तिकानि च दिव्यानि तस्मै ते प्रददुः करं॥ एवं स पुरुषव्याघ्रो वि
त्य दिशमुत्तरां॥ संग्रामान्सुबहून्कृत्वा क्षत्रियैर्दस्युभिः सह॥ स विनिर्जित्य राजंस्तान्करे च विनिवेश्य ३८
ह॥ धनान्यादाय सर्वेभ्यो रत्नानि विविधानि च॥ हयांस्तित्तिरिकल्माषान्शुकपत्रनिभानपि॥ मयूर

सदृशांश्चान्यान्सर्वाननिलरंहसः॥ वृतश्च महता राजन्बलेन चतुरंगिणा॥ आजगाम महावीरः शक्रप्रस्थं
नरोत्तमः॥ २०॥ ॥ इति श्रीमहाभारते सभापर्वणि अर्जुनदिग्विजयो नाम पंचविंशो ध्यायः॥ ॥ वैशंपायन
उवाच॥ एतस्मिन्नेव काले तु भीमसेनोपि वीर्यवान्॥ धर्मराजमनुज्ञाप्य प्रययौ पुरुषर्षभः॥ महता बलचक्रे
ण पर राष्ट्रविमर्दिना॥ वृतो भरतशार्दूलो द्विषच्छोकविवर्धनः॥ स गत्वा राजशार्दूलः पांचालानां पुरं महत्॥
पांचालान्विविधोपायैः सांत्वयामास पांडवः॥ ततः स गंडकाञ्छूरो विदेहान्भरतर्षभः॥ विजित्याल्पेन
कालेन दशार्णानगमत्प्रभुः॥ तत्र दाशार्णको राजा सुशर्मा लोमहर्षणं॥ कृतवान्भीमसेनेन महद्युद्धं नि
रायुधं॥ भीमसेनस्तु तं दृष्ट्वा कर्म तस्य परंतपः॥ अधिसेनापतिं चक्रे सुशर्माणं महाबलं॥ ततः प्राचीं दि
शं भीमो ययौ भीमपराक्रमः॥ सैन्येन महता युक्तः कंपयन्निव मेदिनीं॥ सोश्वमेधेश्वरं राजन्रोच
मानं सहानुजं॥ जिगाय समरे वीरो बलेन बलिनां वरः॥ स विनिर्जित्य कौंतेयो नातितीव्रेण कर्मणा॥

३९ पूर्वदेशं महावीर्यो विजिग्ये कुरुनंदनः॥ ततो दक्षिणमागम्य पुलिंदनगरं महत्॥ सुकुमारं वशे चक्रे सुमित्रं
च नराधिपः॥ ततस्तु धर्मराजस्य शासनाद्भरतर्षभ॥ शिशुपालं महावीर्यमभ्ययाज्जनमेजय॥ शिशुपालोपि
तच्छ्रुत्वा पांडवस्य चिकीर्षितं॥ उपसंगम्य नगरात् प्रत्यगृह्णात्परंतपः॥ तौ समेत्य महाराज कुरुचेदिवृषौ त
था॥ उभयोरात्मकुलयोः कुशलं पर्यपृच्छतां॥ ततो निवेद्य तद्राष्ट्रं चेदिराजो विशांपते॥ उवाच भीमं प्रहसन्कि
मिदं कुरुषेऽनघ॥ तस्य भीमस्तदाचख्यौ धर्मराजचिकीर्षितं॥ स च तत्प्रतिगृह्यैव तथा चक्रे नराधिपः॥ ततो भी
मस्तत्र राजेंद्र उषित्वा त्रिदशाः क्षपाः॥ सत्कृतः शिशुपालेन ययौ सबलवाहनः॥ ॥ इति श्रीमहाभारते सभा
पर्वणि भीमदिग्विजये षड्विंशोऽध्यायः॥ ॥ वैशंपायन उवाच॥ ॥ ततः कुमारविषये श्रेणीमंतमवारयत्॥ ३९
कोशलानामधिपतिं बृहद्बलपराक्रमः॥ अयोध्यायां तु धर्मज्ञं दीर्घप्रज्ञमरिंदमं॥ अजयत्पांडवश्रेष्ठो नातिती
व्रेण कर्मणा॥ ततो गोपालकक्षं तु सोमकानपि चोत्तरान्॥ मल्लानामधिपं चैव पार्थिवं व्यजयत्प्रभुः॥ ततो हिमव

तः पार्श्वे समभ्येत्य जरद्गवं॥ सर्वमल्पेन कालेन देशं चक्रे वशे प्रभुः॥ एवं बहुविधान्देशान्विजि
ग्ये पुरुषर्षभः॥ उन्नाटमभितो जिग्ये कुक्षिमंतं च पर्वतं॥ पांडवः सुमहावीर्यो बलेन बलिनां वरः॥ स काशि
राजं समरे सुबाहुमनिवर्तिनं॥ वशे चक्रे महाबाहुर्भीमो भीमपराक्रमः॥ ततः सुपार्श्वमभितस्तथा रा
जपतिं क्रथं॥ युध्यमानं बलात्संख्ये विजिग्ये पांडवर्षभः॥ ततो मत्स्यान्महातेजा बलवांश्च महाबलान्॥
अर्वाणामधिपं चैव निषधाधिपतिं तथा॥ विजिग्ये भूमिपालांश्च मणिमत्प्रमुखान्बहून्॥ अनवद्या
ग्रहं चैव मत्स्यभूमिं च सर्वशः॥ विजिग्ये च महातेजा मदवीर्यं महाबलं॥ सोमपिथ्यांश्च निर्जित्य प्रययौ
उत्तरामुखः॥ वत्सभूमिं च कौंतेयो विजिग्ये बलवान्बलात्॥ ततो दक्षिणमल्लांश्च भोगवंतं च पांडवः॥
तरसैवाजयद्भीमो नातितीव्रेण कर्मणा॥ विदेहस्थस्तु कौंतेय इंद्रपर्वतमंतिकात्॥ किरातानामधिपती
न्व्यजयत्सप्त पांडवः॥ ततः सुह्मांश्च प्राच्यसुह्मान्सपक्षांश्चैव वीर्यवान्॥ विजित्य युधि कौंतेयो मागधा

स॰प
४०

न्यजयद्बली॥ दंडं च दंडधारं च विजित्य पृथिवीपती॥ तैरेव सहितैः सर्वैर्गिरिव्रजमुपाद्रवत्॥ जरा
संधिं सांत्वयित्वा करे च विनिवेश्य च॥ तैरेव सहितो राजन् कर्णमभ्यद्रवद्बली॥ स कंपयन्निव महीं
बलेन चतुरंगिणा॥ युयुधे पांडवश्रेष्ठः कर्णेनामित्रकर्शिना॥ स कर्णं युधि निर्जित्य वशे चक्रे च वी
र्यवान्॥ ततो विजिग्ये बलवान् राज्ञः पर्वतवासिनः॥ अथ धर्मौदारिं चैव राजानं बलवत्तरं॥ पांडवो बा
हुवीर्येण विजयंतं महारणे॥ ततः पुंड्राधिपं वीरं वासुदेवं महाबलं॥ कौशिकीकच्छनिलयं राजानं चामितौज
सं॥ उभौ बलवतौ वीरावुभौ तीव्रपराक्रमौ॥ निर्जित्याजौ महावीरो वंगराजमुपाद्रवत्॥ समुद्रसेनं निर्जित्य
चंद्रसेनं च पार्थिवं॥ ताम्रलिप्तं च राजानं कंबूनामधिपं तथा॥ सुह्मानामधिपं चैव ये च सागरवासिनः॥ ४०
सर्वान् म्लेच्छगणांश्चैव विजिग्ये भरतर्षभः॥ एवं बहुविधान् देशान् विजित्य पवनात्मजः॥ वसु तेभ्य
उपादाय लौहित्यमगमद्बली॥ स सर्वान् म्लेच्छनृपतीन् सागरद्वीपवासिनः॥ करमाहारयामास रत्नानि

विविधानि च॥ चंदनागुरुवस्त्राणि मुक्ताहयवसूनि च॥ कांचनं रजतं वस्त्रं विद्रुमं च महाद्धनं॥ स को
टिशतसंख्येन धनेन महता ततः॥ अभ्यवर्षदमेयात्मा धनवर्षेण मारुतिः॥ इंद्रप्रस्थमुपागम्य भीमो
भीमपराक्रमः॥ निवेदयामास ततो धर्मराजाय तद्धनं॥ ३०॥ ॥ इति श्री महाभारते सभापर्वणि भीम
दिग्विजयो नाम सप्तविंशतितमोऽध्यायः॥ ॥ वैशंपायन उवाच॥ ॥ तथैव सहदेवोऽपि धर्मराजेन पूजितः॥
महत्या सेनया राजन् प्रययौ दक्षिणां दिशं॥ स शूरसेनान् कार्त्स्न्येन पूर्वमेवाजयत् प्रभुः॥ मत्स्यराजं च कौल
यो वशे चक्रे बलाद्बली॥ अधिराजाधिपं चैव दंतवक्रं महाहवे॥ जिगाय करदं चैव कृत्वा राज्ये न्यवेशा
यत॥ सुकुमारं वशे चक्रे सुमित्रं च नराधिपं॥ तथैवापरमत्स्यांश्च व्यजयत् स पटच्चरान्॥ निषादभूमिं गोशृं
गं पर्वतप्रवरं तथा॥ तरसा व्यजयद्धीमान् श्रेणिमंतं च पार्थिवं॥ नवराष्ट्रं विनिर्जित्य कुंतिभोजमुपाद्रवत्॥ प्री
तिपूर्वं च तस्यासौ प्रतिजग्राह शासनं॥ ततश्चर्मण्वती तीरे जंभकस्यात्मजं नृपं॥ ददर्श वासुदेवेन शेषितं

४१ पूर्ववैरिणा॥ चक्रे तत्र स संग्रामं सह भोजेन भारत॥ स तमाजौ विनिर्जित्य दक्षिणाभिमुखो ययौ॥ नेकानपरने
कोश्मव्यजयत्स महाबलः॥ करांस्तेभ्य उपादाय रत्नानि विविधानि च॥ ततः स्तैरेव सहितो नर्मदाभिमुखो य
यौ॥ विंदानुविंदावावंत्यौ सैन्येन महता वृतौ॥ जिगाय समरे वीरावाश्विनेयः प्रतापवान्॥ ततो रत्नान्युपाद
य पुरीं माहिष्मतीं ययौ॥ तत्र नीलेन राज्ञा स युद्धं चक्रे नरर्षभः॥ पांडवः परवीरघ्नः सहदेवः प्रतापवान्॥
तेनास्य सुमहद्युद्धमासीद्भीरुभयंकरं॥ भूरप्रहर्षणं चैव प्राणानां संशयावहं॥ चक्रे तस्य हि साहाय्यं भगवा
न्हव्यवाहनः॥ ततो हया रथा नागाः पुरुषाः कवचानि च॥ दह्यमानानि दृश्यंते सहदेवबले तदा॥ ततः सुसंभ्रां
तमनाः बभूव कुरुनंदनः॥ नोत्तरं प्रति वक्तुं च शक्तोभूज्जनमेजय॥ ॥जनमेजय उवाच॥ ॥किमर्थं भ
गवानग्निः प्रत्यमित्रोभवद्युधि॥ सहदेवस्य यज्ञार्थं घटमानस्य वै द्विज॥ ॥वैशंपायन उवाच॥ ॥ तत्र मा ४१
हिष्मतीवासी भगवान्हव्यवाहनः॥ श्रूयते निगृहीतो वै पुरस्तात्पारदारिकः॥ नीलस्य राज्ञो दुहिता बभूवातीव शो
भना॥ अग्निहोत्रमुपातिष्ठद्बोधनाय पितुः सदा॥ व्यजनैर्धूयमानोपि तावत्प्रज्वालते न सः॥ यावच्चारुपुटोष्ठे

न वायुना न विधूयते॥ ततः स भगवानग्निश्चकमे तां सुदर्शनां॥ नीलस्य राज्ञः पूर्वेषामुपनीतश्च सोभवत्॥ त
दा ब्राह्मणरूपेण रममाणो यदृच्छया॥ तं तु राजा यथाशास्त्रमशासद्धार्मिकस्तदा॥ प्रजज्वाल ततः कोपाद्भगवा
न्हव्यवाहनः॥ तं दृष्ट्वा विस्मितो राजा जगाम शिरसा कविं॥ चक्रे प्रसादं च ततस्तस्य राज्ञो विभावसुः॥ वरेण
छंदयामास तं तेन पं स्विष्टकृत्तमः॥ अभयं च स जग्राह स्वसैन्ये वै महीपतिः॥ ततः प्रभृति ये केचिदज्ञानात्तां पु
रीं नृपाः॥ जिगीषंति षंति बलाद्राजंस्ते दह्यंतीह वह्निना॥ तस्यां पुर्यां तदा चैव माहिष्मत्यां कुरूद्वह॥ बभूवुर
नभिग्राह्या योषितः पुरुषैः किल॥ एवमग्निर्वरं प्रादात्स्त्रीणामप्रतिवारणे॥ स्वैरिण्यस्तत्र नार्यो हि यथेष्टं विचरं
त्युत॥ वर्जयंति च राजानस्तत्पुरं पुरुषोत्तम॥ भयादग्नेर्महाराज तदा प्रभृति सर्वदा॥ सहदेवस्तु धर्मात्मा सैन्यं दृ
ष्ट्वा भयार्दितं॥ परीतमग्निना राजन्नाकंपत यथा गिरिः॥ उपस्पृश्य शुचिर्भूत्वा सोब्रवीत्पावकं ततः॥ त्वदर्थो
यं समारंभः कृष्णवर्त्मन्नमोस्तु ते॥ मुखं त्वमसि देवानां यज्ञस्त्वमसि पावक॥ पावनात्पावकश्चासि हव
नाद्धव्यवाहनः॥ वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि॥ चित्रभानुः सुरेशश्च अनलस्त्वं विभावसो॥ अग्नि

दुस्पर्शेन श्चापी डला श्रोज्वलनः शिखी॥ वैश्वानरः पिंगकेशो भूरितेजः प्लवंगकः॥ कुमारकस्तु भगवान्नेमगर्भो
नम्मा स्तुते॥ अग्निर्वायुर्दधौदेहवायुः प्राणान्ददधातु मे॥ पृथिवीबलमादध्यात् घाधिवाश्चापः शिवं तु मे॥ अपां
गर्भ महं विप्र जातवेदः सुरेश्वरः॥ देवतानां मुखं त्वं हि सत्येन च मुनीहि मां॥ ऋषिभिर्ब्राह्मणैश्चैव देवतैरसु
रैरपी॥ अनिशं हुतयज्ञेषु सत्येन च पुनीहि मां॥ धूमकेतुः शिखीचत्वं पापहानि रसंभवः॥ सर्वप्राणिषु नित्य
स्थः सत्येन च पुनीहि मां॥ एवंस्तुतः सुमनसाप्रीतस्तु स्तुति नामुया॥ तुष्टिं पुष्टिं स्मृतं चैव प्रीतश्चाग्ने प्रयच्छ
मे॥ ॥वैशंपायन उवाच॥ ॥ इसेवं मंत्र मार्षिवे यो नलं जुहुयाद्बुधः॥ अपमान स्पशेद्धापीत ता स्यापुनर्हीय
ते॥ यज्ञविघ्नमिमं कर्तुं नार्हस्त्वं हव्यवाहन॥ एवमुक्त्वाथ माद्रेयः कुशैरास्तीर्य मेदिनीं॥ विधिवत्पुरुषव्याघ्रः पा
वकं प्रत्युपाविशत॥ प्रमुखे सर्वसैन्यस्य भीतोद्विग्नस्य पार्थिव॥ न चैनमत्यगाद्वह्निर्वेलामिव महोदधिः॥ ४२
तमभ्येत्य शनैर्वह्निरुवाच कुरुनंदनं॥ सहदेवं नृणां देवं सांत्वपूर्वमिदं वचः॥ उत्तिष्ठोत्तिष्ठ कौंतेय जिज्ञासेयं कृ
ता मया॥ वेद्मि सर्वमभिप्रायं तव धर्मसुतस्य च॥ मया तु रक्षितव्येयं पुरी भरतसत्तम॥ यावद्राज्ञोस्य नीलस्य कुलवं

शधरा नृपाः॥ ईप्सितं वै करिष्यामि मनसस्तव भारत॥ तत उत्थाय हृष्टात्मा प्रांजलिः शिरसा नतः॥ पूजयामास माद्रेयः
पावकं पुरुषर्षभः॥ पावके विनिवृत्ते तु नीलो राजाभयात्ततः॥ सत्कारेण नरव्याघ्रं सहदेवं युधांपतिं॥ प्रतिगृह्य च तां
पूजां करं च विनिवेश्य तं॥ माद्रीसुतः स्ततः प्रायाद्विजेतुं दक्षिणां दिशं॥ त्रैपुरं स वशे कृत्वा राजानममितौजसं॥ निज
ग्राह महाबाहुस्तरसा पोधनेश्वरं॥ आकृतिं कौशिकाचार्यं यत्नेन महता ततः॥ वशे चक्रे महाबाहुः सुराष्ट्राधिपतिं
तथा॥ सुराष्ट्रविषयस्थश्च प्रेषयामास रुक्मिणे॥ राज्ञे भोजकटस्थाय महामात्राय धीमते॥ भीष्मकाय स धर्मा
त्मा साक्षादिंद्रसखाय वै॥ स चास्य प्रतिजग्राह शासनं ससुतस्तदा॥ प्रीतिपूर्वं महाराज वासुदेवमवेक्ष्य च॥ ततः स रत्नां
न्यादाय पुरः प्रायाद्युधांपतिः॥ ततः शूर्पारकं चैव देशं प्रायात्कतालूपः॥ वशे चक्रे महातेजा दंडकांश्च महाबलः॥
सागरद्वीपवासांश्च नृपतीन्म्लेच्छयोनयः॥ ततः कोलगिरिं चैव पुरीं चीयलनं तथा॥ द्वीपं ताम्राह्वयं चैव पर्वतं रामकं
तथा॥ तिमिंगिलं च सन्त्रपं वशे चक्रे महापतिः॥ एकपादांश्च पुरुषान्केवलं वनवासिनः॥ नगरीं संजयंतीं च पिच्छंडक
र हाटकं॥ दूतैरेव वशे चक्रे करं चैनानदापयत्॥ पांड्यांश्च द्रविडांश्चैव साहितांश्चोड्रकेरलैः॥ अंध्रांश्च शबरांश्चैव

कलिंगानोड्रकर्णिकान्॥ अंतरीमाश्चैकरोमांश्च यवनानांपुरंतथा॥ दूतैरेव वशेचक्रे करंचैनानदापयत्॥ च
४३ द्रकच्छंगतोधीमान्दूतान्माद्रवतीसुतः॥ प्रेषयामासमाद्रेयः पौलस्त्याय महात्मने॥ विभीषणाय धर्मात्मा प्रीतिपूर्वमरिंद
मः॥ सचास्यप्रतिजग्राहशासनंप्रीतिपूर्वकं॥ तच्चकालकृतं धीमानन्वमन्यतसप्रभुः॥ ततःसंप्रेषयामासरत्ना
निविविधानिच॥ चंदनागरुकाष्टानि दिव्यानिसुबहून्यथ॥ वासांसि सुमहार्हाणि मणींश्च सुमहाधनं॥ न्यवर्त
ततोधीमान्सहदेवोमहाबलः॥ एवंनिर्जित्यतरसा सांत्वेनाविजयेनच॥ करदान्पार्थिवान्कृत्वा प्रत्यागच्छद
रिंदमः॥ धर्मराजायतत्सर्वं निवेद्यभरतर्षभ॥ कृतकर्मासुखंराजन्नुवाससुमहाबलः॥ ६६॥ ॥इतिश्रीमहा
भारतेसभापर्वणिसहदेवविजयोनामाष्टाविंशतिमोध्यायः॥ ॥वैशंपायनउवाच॥ ॥नकुलस्यापिवक्ष्यामि
कर्माणिविजयंतथा॥ वासुदेवजितामाशांयथावासजयत्प्रभुः॥ निर्यायखांडवप्रस्थात्प्रतीचीमभितोदिशं॥ उद्दि
श्यप्रीतिमान्पार्थोमहत्यासेनयावृतः॥ सिंहनादेनमहतायोधानांगर्जितेनच॥ रथनेमिनिनादैश्चकंपयन्वसुधा ४३
धिपान्॥ ततोबहुधनंरम्यंगवाश्वधनधान्यवत्॥ कार्तिकेयस्यदयितंरोहीतकमुपाद्रवत्॥ तत्रयुद्धंमहद्वृत्तंशू

द्रैर्मत्तमयूरकैः॥ मरुभूमिंचकार्त्स्न्येनतथैवबहुधान्यकं॥ शरीषसंसभीमंचवशेचक्रेमहाद्युतिः॥ शिबींस्त्रि
गर्तानवष्टान्मालवान्पंचकावटि॥ तथामध्यमिकायांश्चवाटध्यानान्द्विजानथ॥ पुनःश्चपरिवृत्याथपुष्करारण्य
वासिनः॥ गणानुत्सवसंकेतानजयत्पुरुषर्षभः॥ सिंधुकूलाश्रितायेचग्रामणीयामहाबलाः॥ शूद्राभीरगणा
श्चैवयआश्रित्यसरस्वतीं॥ वर्तयंतिचयेमत्स्यैर्येचपर्वतवासिनः॥ कृत्स्नंपंचनदंचैवतथैवामरपर्वतं॥ उत्तर
ज्योतिषंचैवतथादृढाटकंपुरं॥ द्वारपालिंचतरसावशेचक्रेमहाद्युतिः॥ माठरान्हारहूणांश्चप्रतीच्यांश्चैवते
नृपाः॥ तान्सर्वान्सवशेचक्रेशासनादेवपांडवः॥ तत्रस्थःप्रेषयामासवासुदेवायभारत॥ सचास्यदशभीरा
जैःप्रतिजग्राहशासनं॥ ततःशाकलमभ्येत्यमद्राणांपुटभेदनं॥ मातुलंप्रीतिपूर्वेणशल्यंचक्रेवशेवशी॥ स
तेनसत्कृतोराजासत्कारार्होविशांपते॥ रत्नानिभूरीण्यादायसंप्रतस्थेयुधांपतिः॥ ततःसनागकुक्षिस्था
म्लेच्छान्परमदुर्जयान्॥ पह्लवान्बर्बरांश्चैवकिरातान्यवनान्पुरान्॥ ततोरत्नान्युपादायवशेचक्रेचपार्थि
वान्॥ न्यवर्ततकुरुश्रेष्ठनकुलश्चित्रकर्मकृत्॥ सुरभीणांसहस्राणिकोशंतस्यमहात्मनन॥ इंद्रप्र

स्वगतं वीरं मध्ये स च युधिष्ठिरं॥ ततो माद्रीसुतः श्रीमान् धनं तस्मै न्यवेदयत्॥ एवं विजित्य नकुलो दिशं
वरुणपालितं॥ प्रतीचीं वासुदेवेन निर्जितां पुरुषर्षभः॥ ३०॥ ॥ इति श्रीमहाभारते सभापर्वणि नकुलदिग्वि
जयो नामैकोनत्रिंशो ध्यायः॥ ॥ वैशंपायन उवाच॥ रक्षणाद्धर्मराजस्य धर्मस्य परिपालनात्॥ शत्रू
णां क्षपणाच्चैव स्वकर्मनिरताः प्रजाः॥ बलीनां सम्यगादानाद्धर्मतश्चानुशासनात्॥ निकामवर्षी प
र्जन्यः स्फीतो जनपदोऽभवत्॥ सर्वारंभाः सुप्रवृत्ता गोरक्षं कर्षणं वणिक्॥ विशेषात्सर्वमेवैतत्संजज्ञे राज
कर्मणः॥ दस्युभ्यो वंचकेभ्यो वा राजन्प्रीतिः परस्परं॥ जरावल्लभता चैव नाश्रूयंत मृषा गिरः॥ अवर्षं चाति
वर्षं च व्याधिः पावकमूर्छनं॥ सर्वमेतत्तदा नासीद्धर्मनित्ये युधिष्ठिरे॥ प्रियं कर्तुमुपस्थातुं बलिकर्म स्वभा ४४
वजं॥ अभिहर्तुं नृपा जग्मुः नान्यैश्चार्यैः कथंचन॥ धर्म्यैर्धनागमैस्तस्य ववृधे निचयो महान्॥ कर्तुं त
स्य न शक्येत क्षयो वर्षशतैरपी॥ स कोशस्य परीमाणं कोष्ठस्य च महीपतिः॥ विज्ञाय राजा कौंतेयो यज्ञा

येव मनो दधे॥ सुहृदश्चैव ते सर्वे पृथक्च सह चाब्रुवन्॥ यज्ञकालस्तव विभो क्रियतामत्र सांप्रतं॥ अथैवं ब्रु
वतामेव तेषामभ्याययौ हरिः॥ ऋषिः पुराणो वेदात्मा दृश्यश्चापि विजानतां॥ जगतस्तस्थुषां श्रेष्ठः प्रभवश्चा
प्ययश्च ह॥ भूतभव्यभवन्नाथः केशवः केशिसूदनः॥ प्राकारः सर्ववृष्णीनामापत्स्वभयदोऽरिहा॥ बलाधि
कारे निक्षिप्य संहत्यानकदुंदुभिः॥ उच्चावचमुपादाय धर्मराजाय माधवः॥ अर्थौघं पुरुषव्याघ्रो बलेन म
हतावृतः॥ तं धनौघमपर्यंतं रत्नसागरमक्षयं॥ नादयन्रथघोषेण प्रविवेश पुरोत्तमं॥ पूर्णमापूर
यंस्तेषां द्विषच्छोकावहोऽभवत्॥ असूर्यमिव सूर्येण निर्वातमिव वायुना॥ कृष्णेन समुपेतेन जहृषे भार
तं पुरं॥ भीमार्जुनमुखैश्चैव सहितः कृष्णमब्रवीत्॥ त्वत्कृते पृथिवी सर्वा मद्वशे कृष्ण वर्तते॥ धनं च बहु वा
र्ष्णेय त्वत्प्रसादादुपार्जितं॥ महदिच्छामि तं सर्वं विधिवद्देवकीसुत॥ उपयोक्तुं द्विजातिभ्यो हव्यवाहे च मा
धव॥ त्वयि स्थिते दाशार्ह विपाप्मा भविता ह्ययं॥ मां वाप्यभ्यनुजानीहि सहैभिरनुजैर्विभो॥ अनुज्ञातस्त्व

याः कृष्ण प्राप्नुयां गतिमुत्तमां॥ तं कृष्णः प्रत्युवाचेदं बहुत्वाद्गुणविस्तरं॥ त्वमेव राजशार्दूल सम्राडर्हो महाक्र
तुं॥ संप्राप्नुहि त्वया प्राप्ते कृतकृत्यास्ततो वयं॥ यजस्वाभीप्सितं यज्ञं मयि श्रेयस्यवस्थिते॥ नियुंक्ष्व चापि मां
कृत्ये सर्वं कर्तास्मि ते वचः॥ ॥युधिष्ठिर उवाच॥ ॥सफलः कृष्ण संकल्पः सिद्धिश्च नियता मम॥ यस्य
मे त्वं हृषीकेश यथेप्सितमुपस्थितः॥ ॥इति श्री महाभारते सभापर्वणि कृष्ण युधिष्ठिर वाक्यं नाम त्रिं
शोध्यायः॥ वैशंपायन उवाच॥ ॥अनुज्ञातस्तु कृष्णेन पांडवो भ्रातृभिः सह॥ ईप्सितं राजसूयाय साधनान्युपच
क्रमे॥ ततः स्त्वाज्ञापयामास पांडवो रिपुबर्हणः॥ सहदेवं कुरुश्रेष्ठ मंत्रिणश्चैव सर्वशः॥ अस्मिन्क्रतौ यथोक्ता
नि यज्ञांगानि द्विजातिभिः॥ यथोपकरणं सर्वं मंगलानि च सर्वतः॥ अधियज्ञांश्च संभारान् धौम्योक्तान्क्षिप्र
मेव हि॥ समानयंतु पुरुषा यथायोगं यथाक्रमं॥ इंद्रसेनो विशोकश्च पुरुश्चार्जुनसारथिः॥ अन्नाद्याहर
णे युक्ताः संतु मत्प्रियकाम्यया॥ क्रियंतां सर्वकामाश्च रसगंधसमन्विताः॥ मनोरमाः प्रीतिकरा द्विजा

नां कुरुसत्तम॥ तद्वाक्यसमकालं तु कृतं सर्वं न्यवेदयत्॥ सहदेवो युधां श्रेष्ठो धर्मराजे महात्मनि॥ ततो द्वैपाय
नो राजन्नृत्विजः समुपानयत्॥ वेदानिव महाभागान्साक्षान्मूर्तिमतो द्विजान्॥ स्वयं ब्रह्मत्वमकरोत
त्सत्यवतीसुतः॥ धनंजयानामृषभः सुसामा सामगोभवत्॥ याज्ञवल्क्यो बभूवाथ ब्रह्मिष्ठोध्वर्युसत्तमः॥
पैलो होता वसोः पुत्रो धौम्येन च सह प्रभो॥ एतेषां पुत्रवर्गाश्च शिष्याश्च भरतर्षभ॥ बभूवुर्होत्रिकाः सर्वे वे
दवेदांगपारगाः॥ ते पूजिताश्च पुण्याहं वाचयित्वा च तं विधिं॥ शास्त्रोक्तं योजयामासुस्तद्देवयजनं महत्॥ तत्र
चक्रुरनुज्ञाता शरणान्युत शिल्पिनः॥ रत्नवंति विशालानी वेश्मानि वेदिकोकसां॥ तत आज्ञापयामास स रा
जा राजसत्तमः॥ सहदेवं तदा मध्यमं त्रिणं कुरुसत्तमः॥ आमंत्रणार्थं दूतांस्त्वं प्रेषयाशुगान्कृतं॥ उपश्रु
त्य वचो राज्ञः स दूतान्प्राहिणोत्तदा॥ आमंत्रयध्वं राष्ट्रेष्वो ब्राह्मणान्क्षत्रियानपि॥ विशश्च शूद्रान्मान्यांश्च
सर्वानानयतेति च॥ ॥वैशंपायन उवाच॥ ॥ते सर्वान्पृथिवीपालान्पांडवेयस्य शासनात्॥ आमंत्र

स०प
४६

योबभत्सुश्च प्रेषयामास चापरान् ॥ ततः स्ततु यथाकालं कुंतीपुत्रं युधिष्ठिरं ॥ दीक्षयां चक्रिरे विप्रा राजसूयस्य भा
रत ॥ दीक्षितः स तु धर्मात्मा धर्मराजो युधिष्ठिरः ॥ जगाम यज्ञायतनं वृतो विप्रैः सहस्रशः ॥ भ्रातृभिर्ज्ञातिभिश्चै
व सुहृद्भिः सचिवैस्तथा ॥ क्षत्रियैश्च मनुष्यैश्च नानादेश समागतैः ॥ अमात्यैश्च नरश्रेष्ठ धर्मो विग्रहवानिव ॥
आजग्मु ब्राह्मणास्तत्र विषयेभ्यस्ततस्ततः ॥ सर्वविद्यासु निष्णाता वेदवेदांगपारगाः ॥ तेषामावसथांश्चैव ध
र्मराजस्य शासनात् ॥ बहून्नांबु धनैर्युक्तान् सगणानां पृथक् पृथक् ॥ एवं तु गुणसंपन्नान् शिल्पिनोप स
हस्रशः ॥ तेषु ते न्यवसंन् राजन् ब्राह्मणा नृप सत्कृताः ॥ कथयंतः कथा बह्वीः पश्यंतो नटनर्तकान् ॥ भुंज
तां चैव विप्राणां वदतां च महास्वनः ॥ अनिशं श्रूयते तत्र मुदितानां महात्मनां ॥ दीयतां दीयतामेषां भुं
ज्यतां भुंज्यतामिति ॥ एवं प्रकाशाः संकल्पाः श्रूयंते स्मात्र विस्मयः ॥ गवां शतसहस्राणी शयनानां च भार ४६
त ॥ रुक्मस्य योषितां चैव धर्मराजः पृथक् ददौ ॥ प्रवर्ततेव यज्ञः स पांडवस्य महात्मनः ॥ पृथिव्यामेकवीरः

स्य राज्ञस्येव त्रिविष्टपे ॥ ततो युधिष्ठिरो राजा प्रेषयामास पांडवः ॥ नकुलं हास्तिनपुरं भीष्माय भरतर्ष
भ ॥ द्रोणाय धृतराष्ट्राय विदुराय कृपाय च ॥ भ्रातृणां चैव सर्वेषां येनुरक्ता युधिष्ठिरे ॥ २७ ॥ ॥ इति श्रीम
हाभारते सभापर्वणि राजसूये एकत्रिंशोध्यायः ॥ ॥ वैशंपायन उवाच ॥ ॥ स गत्वा हास्तिनपुरं नकु
लः समितिंजयः ॥ भीष्ममामंत्रयां चक्रे धृतराष्ट्रं च पांडवः ॥ सत्कृत्यामंत्रितास्तेतु आचार्यप्रमुखास्त
तः ॥ प्राययुः प्रीतमनसो यज्ञं ब्रह्मपुरःसराः ॥ संश्रुत्य धर्मराजस्य यज्ञं यज्ञविदस्तदा ॥ अन्ये च श
तशस्तुष्टैर्मनोभिर्भरतर्षभ ॥ द्रष्टुकामाः सभां चैव धर्मराजं च पांडवं ॥ नानादिग्भ्यः समापेतुः क्षत्रि
याः स्तत्र भारत ॥ समुपादाय रत्नानि विविधानि महांति च ॥ धृतराष्ट्रश्च भीष्मश्च विदुरश्च महामतिः ॥
दुर्योधनपुरोगाः भ्रातरः सर्व एव ते ॥ सत्कृत्यामंत्रिताः सर्वे आचार्यप्रमुखादयः ॥ गांधारराजः
सुबलः शकुनिश्च महाबलः ॥ अचलो वृषकश्चैव कर्णश्च रथिनां वरः ॥ स्तुतः शल्यश्च बलवान् बाह्लीक

४१ श्च महारथः॥ सोमदत्तोथ कौरव्यो भूरिभूरिश्रवाश्शलः॥ अश्वत्थामा कृपो द्रोणः सैंधवश्च जयद्रथः॥ यज्ञसे
नः सपुत्रः श्च शाल्वश्च वसुधाधिपः॥ प्राज्योतिषश्च नृपतिः भगदत्तो महायशाः॥ सह सर्वैस्तथा म्लेच्छैः
सागरानूपवासिभिः॥ पार्वतीयाश्च राजानो राजा चैव बृहद्बलः॥ पौंड्रको वासुदेवश्च कलिंगा वंगकास्त
था॥ आकर्षकुंतलश्चैव मानवाअंध्रकास्तथा॥ द्राविडा सिंहलाश्चैव राजा काश्मीरकस्तथा॥ कुंतिभोजो
महातेजाः पार्थिवो गौरवाहनः॥ बाह्लीकाश्चापरे शूरा राजानः सर्व एव ते॥ विराटः सह पुत्रैश्च मावेल्लश्च
महारथः॥ राजानो राजपुत्राश्च नानाजनपदेश्वराः॥ शिशुपालो महावीर्यः सह पुत्रेण भारत॥ आगच्छत्पां
डवेयस्य यज्ञं परमदुर्मदः॥ रामश्चैवानिरुद्धश्च वभ्रुश्च सहसारणः॥ गदः प्रद्युम्नसांबश्च चारुदेष्णश्च वीर्यवान्॥ ५१
उल्मुको निशठश्चैव वीरः प्राद्युम्निरेव च॥ वृष्णयो निखिलाश्चान्ये समाजग्मुर्महारथाः॥ एते चान्ये च बहवो
राजानो मध्यदेशजाः॥ आजग्मुः पांडवेयस्य राजसूयं महाक्रतुं॥ ददुस्तेषामावसथान्धर्मराजस्य

शासनात्॥ बहुभक्षान्वितान्राजदीर्घिकावृक्षशोभितान्॥ तथा धर्मात्मजः पूजां चक्रे तेषां महात्मनां॥ सत्कृ
ताश्च यथोद्दिष्टान्जग्मुरावसथान्नृपाः॥ कैलासशिखरप्रख्यान्मनोज्ञान्द्रव्यभूषितान्॥ सर्वतः संवृतानु
च्चैः प्राकारैः सुकृतैः सितैः॥ सुवर्णजालसंवीतान्मणिकुट्टिमभूषितान्॥ सुखारोहणसोपानान्महास
नपरिच्छदान्॥ स्रग्दामसमवच्छन्नानुत्तमागुरुगंधिनः॥ हंसांगवर्णसदृशानायोजनसुदर्शनात्॥ असंबा
धसमद्वारान्युक्तानुच्चावचैर्गुणैः॥ बहुधातुनिबद्धांगान्हिमवच्छिखराणि च॥ विश्रांतास्ते ततोपश्यन्भूमि
पान्भूरिदक्षिणान्॥ वृतं सदस्यैर्बहुभिर्धर्मराजं युधिष्ठिरं॥ तत्सदः पार्थिवैः कीर्णं ब्राह्मणैश्च महात्मभिः॥
-श्री= भ्राजते स्म तदा राजन्नाकपृष्ठमिवामरैः॥ २५॥ ॥ इतिश्रीमहाभारते सभापर्वणि द्वात्रिंशोध्यायः॥ ॥
वैशंपायन उवाच॥ ॥ पितामहं गुरुं चैव प्रत्युद्गम्य युधिष्ठिरः॥ अभिवाद्य तदा राजन्निदं वचनमब्रवी
त्॥ भीष्मं द्रोणं कृपं द्रौणिं दुर्योधनविविंशती॥ अस्मिन्यज्ञे भवंतो मामनुगृह्णंतु सर्वशः॥ इदं वः सु

स·प
४८

स्त्वहं चैव यदिहास्ति धनं मम॥ प्रणयंतु धनं तावन्मां यथेष्टममित्रकर्शनाः॥ एवमुक्त्वा स तान्सर्वान्दी
क्षितः पांडवाग्रजः॥ युयोज स यथाकालमधिकारेष्वनंतरं॥ भक्ष्यभोज्याधिकारेषु दुःशासनमयोज
यत्॥ परिग्रहे ब्राह्मणानामश्वत्थामानमुक्तवान्॥ राज्ञां तु प्रतिपूजार्थं संजयं संन्ययोजय
त्॥ कृताकृतपरिज्ञाने भीष्मद्रोणौ महामती॥ हिरण्यस्य सुवर्णस्य रत्नानां चान्ववेक्षणे॥ दक्षिणा
नां चैव दाने कृपं राजान्ययोजयत्॥ तथान्यान्पुरुषव्याघ्रस्तस्मिन्यज्ञेन्ययोजयत्॥ बाह्लीको धृतरा
ष्ट्रश्च सोमदत्तो जयद्रथः॥ नकुलेन समानीताः स्वामिवत्तत्र रेमिरे॥ क्षत्ता व्ययकरस्त्वासीद्विदुरः सर्व
धर्मवित्॥ दुर्योधनः स्त्वर्हणानि प्रतिजग्राह सर्वशः॥ सर्वलोकः समावृत्तः पिप्रीषुः फलमुत्तमं॥ ४८
द्रष्टुकामः सभां चैव धर्मराजं च पांडवं॥ न कश्चिदाहरत्तत्र सहस्रावरमर्हणां॥ रत्नैश्च बहुभिः स्तत्र
=य= धर्मराजमवर्धयन्॥ कथं तु मम कौरव्यो रत्नदानैः समाप्नुयात्॥ यज्ञमित्येव राजानः स्पर्धमाना ददुर्धनं॥

भवनैः सविमानाग्रैः सोदर्कैर्बलसंवृतैः॥ राजभिश्च समावृत्तैरतीव श्रीसमृद्धिभिः॥ अशोभत महायज्ञः
कौंतेयस्य महात्मनः॥ ऋद्ध्या च वरुणं देवं स्पर्धमानो युधिष्ठिरः॥ षडग्निनाथ यज्ञेन सोयजद्दक्षिणावता॥
सर्वान्जनान्सर्वकामैः समृद्धैः समवर्तयत्॥ अन्नवान्बहुभक्ष्यश्च भुक्तवज्जनसंवृतः॥ रत्नोपहारकर्मा
ढ्यो बभूव स समागमः॥ इडाज्यहोमाहुतिभिर्मंत्रशिक्षाविशारदैः॥ तस्मिन्हि ततृपुर्देवास्तते यज्ञे महर्
षिभिः॥ यथा देवाः स्तथा विप्रा दक्षिणान्नमहाधनैः॥ ततृपुः सर्ववर्णाश्च तस्मिन्यज्ञे मुदान्विताः॥ ॥इ
ति श्री सभापर्वणि राजसूये पंचत्रिंशोध्यायः॥ ॥वैशंपायन उवाच॥ ॥ततोभिषेचनीयेन ब्राह्मणा राज
भिः सह॥ अंतर्वेदिं प्रविविशुः सत्कारार्थं महर्षयः॥ नारदप्रमुखाः स्तस्यामंतर्वेद्यां महर्षयः॥ समासीनाः शुशुभि
रे सह राजर्षिभिः स्तथा॥ समेता ब्रह्मसदने देवा देवर्षयस्तथा॥ कर्मांतरसमापन्नो यथा प्रभुरमितौजसः॥
इदमेवं न चाप्येवमेवमेवं न चान्यथा॥ इत्यनुव्रत्व स्तत्र वितंडानां परस्परं॥ कृशानर्थांस्तत्र केचिदकृशांस्त

४८ त्रप्रकुर्वते॥ अकृशाश्चकृशांश्चक्रुर्हेतुभिः शास्त्रनिश्चितैः॥ तत्र मेधाविनः किंचिदर्थमन्यैरुदीरितं॥ वि
चिक्षिपुर्यथा श्येना नभोगतयथामिषं॥ केचिद्धर्मार्थसंयुक्ताः कथास्तत्र महात्रताः॥ रेमिरे कथयंतश्च
सर्वे वेदविदांवराः॥ सावेदा वेदसंपन्नैर्देवद्विजमहर्षिभिः॥ आबभासे समाकीर्णा नक्षत्रैर्द्यौरिवामला॥ न
तस्यां सन्निधौ शूद्रः कश्चिदासीन्न चाव्रती॥ अंतर्वेद्यां तदा राजन् युधिष्ठिरनिवेशने॥ तां तु लक्ष्मीवतो लक्ष्मी
तदा यज्ञविधानजां॥ तुतोष नारदः पश्यन्धर्मराजस्य धीमतः॥ १०॥ अथ चिंतां समापेदे स मुनिर्मनुजाधि
प॥ नारदः स्तु तथा दृष्ट्वा सर्वक्षत्रसमागमं॥ सस्मार च पुरावृत्तां कथां तां पुरुषर्षभ॥ अंशावतरणे यासा ४८
ब्रह्मणो भवनेऽभवत्॥ देवानां संगमं तं तु विज्ञाय यदुनंदने॥ नारदः पुंडरीकाक्षं सस्मार मनसा ह
रिं॥ स साक्षाद्विबुधारिघ्नः क्षेत्रे नारायणः प्रभुः॥ प्रतिज्ञां पालयन् धीमान् जातः परपुरंजयः॥ संदिदेश
पुरा यो सौ विबुधान्भूतकृत्स्वयं॥ अन्योन्यमभिनिघ्नंतः पुनर्लोकानवाप्स्यथ॥ इति नारायणः शंभुः

भगवान्भूतभावनः॥ आदिश्य विबुधान्सर्वानजायत यदुक्षये॥ क्षितावंधकवृष्णीनां वंशे क्षितिभृ
तां वरः॥ परया शुशुभे लक्ष्म्या नक्षत्राणामिवोडुराट्॥ यस्य बाहुबलं सेंद्राः सुराः सर्व उपासते॥ सोऽयं
मानुषरूपेण हरिरास्ते रिमर्दनः॥ अहो बत महद्भूतं स्वयंभूर्यदिदं स्वयं॥ आदास्यति पुनः क्षत्रमेवं बल
समन्वितं॥ इत्येतां नारदश्चिंतां चिंतयामास धर्मवित्॥ हरिं नारायणं ज्ञात्वा यज्ञैरीज्यं तमीश्वरं॥ ततो ध
र्मविदां श्रेष्ठो धर्मराजस्य धीमतः॥ महाध्वरे महाबुद्धिस्तस्थौ स बहुमानितः॥ ततो भीष्मोऽब्रवीद्राजन्
धर्मराजमिदं वचः॥ क्रियतामर्हणं राज्ञां यथार्हमिति भारत॥ आचार्यमृत्विजं चैव संयुक्तं च युधिष्ठि
र॥ स्नातकं च प्रियं चैव षडर्घ्यान्नृपतिस्तथा॥ एतानर्हानभिगतानाहुः संवत्सरोषितान्॥ त इमे भ्यागता राज
न्नर्हंति स्मानुपागताः॥ एवमेकैकशो राजन् नृपाः समुपनीयतां॥ अथ चैषां वरिष्ठाय समर्थायोपनीयतां॥
॥ युधिष्ठिर उवाच॥ ॥ कस्मै भवान्मन्यसेऽर्घमेकस्मै कुरुनंदन॥ उपनीयमानं युक्तं स्यात्तन्मे ब्रूहि पितामह॥

स.प वैशंपायन उवाच॥ ॥ततो भीष्मः शांतनवो बुध्वा निश्चित्य भारत॥ वार्ष्णेयं मन्यते कृष्णं अर्हणीयतमं भुवि॥ एवं
५० ह्येषां समस्तानां तेजोबलपराक्रमैः॥ मध्ये तपन्निवाभाती ज्योतिषामिव रश्मिवान्॥ असूर्यमिव सूर्येण निर्वातं
मिव वायुना॥ भासितं ह्लादितं चैव कृष्णेनेदं सदो हि तः॥ तस्मै भीष्माभ्यनुज्ञातः सहदेवः प्रतापवान्॥ उपाजह्रे
थ विधिवद्वार्ष्णेयायार्घमुत्तमं॥ प्रतिजग्राह तं कृष्णः शास्त्रदृष्टेन कर्मणा॥ शिशुपालस्तु तां पूजां वासुदेवे न
चक्षमे॥ स उपालभ्य भीष्मं च धर्मराजं च संसदि॥ अपाक्षिपद्वासुदेवं चेदिराजो महाबलः॥ २२॥ ॥इति श्री
महाभारते सभापर्वणि राजसूये अर्घाभिहरणे चतुस्त्रिंशोध्यायः॥ ॥शिशुपाल उवाच॥ ॥नायमर्ह
ति वार्ष्णेयस्तिष्ठत्स्विह महात्मसु॥ महीपतिषु कौरव्य राजवत्पार्थिवार्हणं॥ नायं युक्तः समाचारः पांडवेषु महात्मसु॥ ५०
यत्कामात्पुंडरीकाक्षं पांडवार्चितवानसि॥ बाल्यवानासि कौरव्य धर्मः सूक्ष्मो हि पांडव॥ अयं च स्मृत्यतिक्रांत
आपगेयोल्पदर्शनः॥ त्वादृशो धर्मयुक्तो हि कुर्वाणः प्रियकाम्यया॥ भवत्यभ्यधिको भीष्मो लोकेष्ववमतः स
तां॥

कथं ह्यराजा दाशार्हो मध्ये सर्वमहीक्षितां॥ अर्हणामर्हति तथा यथा युष्माभिरर्चितः॥ अथवा मन्यसे कृष्णं स्थविरं भर
तर्षभ॥ वसुदेवे स्थिते वृद्धे कथमर्हति तत्सुतः॥ अथवा वासुदेवोपि प्रियकामोनुवृत्तवान्॥ द्रुपदे तिष्ठति कथं माधवो
र्हति पूजनं॥ आचार्यं मन्यसे कृष्णमथवा कुरुनंदन॥ द्रोणे तिष्ठति वार्ष्णेयं कस्मादर्चितवानसि॥ ऋत्विजं मन्यसे कृ
ष्णमथवा कुरुनंदन॥ द्वैपायने स्थिते विप्रे कथं कृष्णोर्चितस्त्वया॥ भीष्मे शांतनवे राजन्स्थिते पुरुषसत्तमे॥ स्वच्छं
दमृत्युके राजन्कथं कृष्णोर्चितस्त्वया॥ कृपे च भारताचार्ये कथं कृष्णोर्चितस्त्वया॥ अश्वत्थाम्नि स्थिते वीरे सर्वशा
स्त्रविशारदे॥ कथं कृष्णस्त्वया राजन्नर्चितः कुरुनंदन॥ दुर्योधने च राजेंद्रे स्थिते पुरुषसत्तमे॥ धौम्ये किंपुरुषा
चार्यमतिक्रम्य तथार्चितः॥ भीष्मके च दुराधर्षे पांडवत्कृतलक्षणे॥ नृपे च रुक्मिणि श्रेष्ठे एकलव्ये तथैव च॥
शल्ये मद्राधिपे चैव कथं कृष्णोर्चितस्त्वया॥ अयं च सर्वराज्ञां वै बलश्लाघी महाबलः॥ जामदग्न्यस्य दयितः शि
ष्यो विप्रश्च भारत॥ येनात्मबलमाश्रित्य राजानो युधि निर्जिताः॥ तं च कर्णमतिक्रम्य कथं कृष्णोर्चितस्त्वया॥ न

५१ ऋत्विङ्न चाचार्यो न राजायं महाबलः॥ अर्चितः कुरुश्रेष्ठ प्रियत्वात्प्रियकाम्यया॥ अथवाप्यर्चनीयोयं यु
ष्माकं मधुसूदनः॥ त्रयघामक रान्सर्वे नलोषणां नं च संस्तनत्॥ अस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः॥
नरानस्मै प्रयच्छामः सोयमस्मान्न मन्यते॥ किं मन्यद्वमानाद्धीयदेनं राजसंसदि॥ अप्राप्तलक्षणं कृष्णमर्घ
प्यार्चितवानसि॥ अकस्माद्धर्मराजस्य धर्मात्मेति यशोगतं॥ को हि धर्मच्युतं पूजामेवं युक्तं समाहरत्॥ यो
यं वृष्णिकुले जातो राजानं हतवान्पुरा॥ जरासंधं महात्मानमन्येयेन दुरात्मवान्॥ अद्य धर्मात्मता चैव व्यपकृष्टा
युधिष्ठिरात्॥ कृपणत्वं निविष्टं च कृष्णेर्घस्य निवेदनात्॥ यन्न भीतास्तु कौंतेयः कृपणाश्च तपस्विनः॥ ननु त्व
यापि बोद्धव्यं पूजां माधव यार्हति॥ अथवा कृपणैरेवमुपनीतां जनार्दन॥ पूजामनर्हः कस्मात्त्वमभ्यनुज्ञातुम
र्हसि॥ अयुक्तामात्मनः पूजां त्वं पुनर्बहुमन्यसे॥ हविषः प्राप्य निष्पंदं प्राशितुं श्वेव निर्जने॥ न त्वयं पार्थिवेंद्रा ५१
णामपमानः प्रयुज्यते॥ त्वामेव कुरवो व्यक्तं प्रलंभंते जनार्दने॥ क्लीबे दारक्रिया यादृक् अंधे वा रूपदर्शनं॥

अराज्ञो राजवत्पूजा तथा ते मधुसूदन॥ दृष्टो युधिष्ठिरो राजा दृष्टो भीष्मश्च यादृशः॥ वासुदेवोप्ययं दृष्टः सर्वमेव
यथातथा॥ इत्युक्त्वा शिशुपालस्तु उत्थाय परमासनात्॥ निर्ययौ सदसस्तस्मात्सह साराजभिः स्तदा॥ ३१॥ इ
ति श्रीमहाभारते सभापर्वणि शिशुपालवधपंचत्रिंशोध्यायः॥ ॥वैशंपायन उवाच॥ ॥ततो युधिष्ठिरो राजा
शिशुपालमुपाद्रवत्॥ उवाच चैनं मधुरं सांत्वपूर्वमिदं वचः॥ नेदं युक्तं महीपाल यादृशं वै त्वमुक्तवान्॥ अ
धर्मश्च परो राजन्पारुष्यं च निरर्थकं॥ न हि धर्मं परं जातु नावबुध्येत पार्थिव॥ भीष्मः शांतनवस्त्वेनमावमंस्था
अतोन्यथा॥ तस्य चैषान्महीपालांस्ततो बुद्धतरान्बहून्॥ मर्षंते चार्हणां कृष्णे तद्वत्त्वं क्षंतुमर्हसि॥ वेदतत्त्वेन कृ
ष्णं हि भीष्मश्चेदिपते भृशं॥ न ह्येनं त्वं यथा वेत्थ यथैनं वेद कौरवः॥ ॥भीष्म उवाच॥ ॥नास्मै नेयोनुनयो
देयो नायमर्हति सांत्वनं॥ लोकवृद्धतमे कृष्णे योर्हणां नानुमन्यते॥ क्षत्रियः क्षत्रियं जित्वा रणे रणकृतां वरः॥
यो मुंचति वशे कृत्वा गुरुर्भवति तस्य सः॥ अस्यां च समितौ राज्ञामेकमप्यजितं युधि॥ न पश्यामि महीपाल

स·प सात्वतीपुत्रसात्वतां॥ नचकेवलमस्माकमयमर्च्यतमोच्युतः॥ त्रयाणामपिलोकानामर्चितव्योजनार्द
५२ नः॥ कृष्णेनहिजितायुद्धेबहवःक्षत्रियर्षभाः॥ जगत्सर्वंचवार्ष्णेयेनिखिलेचप्रतिष्ठितं॥ तस्मात्सत्स्वपि
वृद्धेषुकृष्णमर्चामनेतरान्॥ एवंवक्तुंचनार्हस्त्वंमातेभूद्बुद्धिरीदृशी॥ ज्ञानवृद्धामयाराजन्बहवःप
र्युपासिताः॥ तेषांकथयतांशौरेरहंगुणवतोगुणान्॥ समागतानामश्रौषंबहून्बहुमतान्सतां॥ कर्माण्य
पिजातस्यबालप्रभृतिधीमतः॥ बहुशःकथ्यमानानीनरैर्भूयःश्रुतानिमे॥ नकेवलंवयंकामंचेदिरा
जजनार्दनं॥ सर्वांधिकंपुरस्कृत्यप्रीत्यर्थंनकथंचन॥ अर्चामहेर्चितंसद्भिर्भुविभीमपराक्रमं॥ यशं
शःशौर्यंजंचास्यविज्ञायार्चांप्रयुज्महे॥ नकश्चिदिहचास्माभिःसुबालोप्यपरीक्षितः॥ गुणैर्वृद्धानतिक्रम्यह
रिरर्च्यतमोमतः॥ ज्ञानवृद्धोद्विजातीनांक्षत्रियाणांबलाधिकः॥ वैश्यानांधान्यधनवान्शूद्राणामेवजन्म ५२
तः॥ पूज्यतावपिगोविंदेहेतूद्वावपिसंस्थितौ॥ वेदवेदांगविज्ञानंबलंचाप्यमितंबलं॥ नृणांहिलोकेकोन्यो